

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

र॰टी॰
१

ॐ नमो गणपतये ॥ सानंदानंदवंशे स्फुरदभिदुरसप्रामल्लवर्गे सरोषाः कंसे सभ्रा-
न्तविस्त्रप्रियसखसरसीजन्मभाजस्त्वदृपाः ॥ रज्यंतः स्त्रीसभे भास्वदतुलमहिम-
श्रीभरा रंगभूमौ कल्याणं कल्पयंतां हरिहलधरयोर्नैकलक्ष्याः कटाक्षाः ॥
१॥ श्रीमद्गोपालभट्टेन द्रविडक्ष्मासुपर्वणा। क्रियते रसमंजर्याष्टीका रसिकरं-
जनी।२॥ प्रारिप्सितरसमंजरीग्रंथनिर्विघ्नपरिसमाप्तये स्वेष्टदेवतेभवौ वस्तु-
निर्देशत्वेन दर्शयन् भानुकरनामा कविर्मंगलमाचरति ॥ आत्मीयमिति ॥
हृदः शिवो जयतीत्यध्याहार्यः। यत्र तु ह्यावप्यध्याहार्यौ। यः प्रियतमां अंगे दधा-
नः सन् निम्नोन्नतायां भुवि नीचोच्चप्रदेशे पुरतो यतः आत्मीयं स्वीयं चरणं द-
धाति धरति। प्रियायास्तु इतरचरणकमलयोर्व्यथा न स्यादिति भावः। पुनः

Acc. NO. ~~1636~~ M-1498
Title - रसमञ्जरीटीका. (रसिकारञ्जनी)
Author - गोपालभट्ट.
Date - ?
Subject - Rhetori
folio - 65
Xerox - 126.

K K S U LIBRARY RAMTEK 441 106 M-1498 Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्याः श्रमाशंकया तरोः पुष्पं स्वीयेनैव करेण कर्षति आकृष्यावचिनोति। तस्या
भूषणविरचनायेति भावः। पुष्पमिति जात्या एकवचनं। शंका त्रासे वितर्के चेति
विश्वः। किंच अन्यदपि। मृगत्वचा विरचिते तल्पे शय्यायां निजैर्भोगैः। एकदेशैः।
निद्राति स्वपिति। निपूर्वो द्रा धातुः शयनार्थे। उपसर्गेण धात्वर्थो बलादन्यत्र
नीयत इति वचनात्। कठोरमृगचर्मस्पर्शेणाति मृदुप्रियांगलतिकायाः पीडा
न भवेदिति भीत्येति भावः। कथंभूतां प्रियतमां। अंतः प्रेमरसालसां। अंतर्हृद
ये यत्प्रेम तस्य रसः आस्वादनं तेन अलसां निर्व्यापारां। अतः स्वयमेव दृतत्पानि
त्यर्थः। अंतः प्रेमरसालस इति पाठे। एवंभूतस्यापि दरस्य ताद्दग्व्यापारकर
णस्य प्रियतमामिति विशेषणात् अनुकूलत्वं सुचितमित्यर्थः। निम्नं गंभीरं। स्यात्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० टी०
२

रःषु रतो ग्रत इत्यमरः। शार्दूलविक्रीडितं वृत्तं। तल्लक्षणं। अर्काश्वैर्यमःसजौस
ततगाः शार्दूलविक्रीडितं॥ २॥ संप्रति ग्रंथकरणेप्रयोजनं निरूपयति॥ विद्वदिति॥
श्रीमद्भानुनाकविना एषा रसमंजरी रसः शृंगारादिस्तद्घटका मंजरीव मंजरी प्रका
श्यते प्रकटीक्रियते। अन्यापि मंजरी भानुना सूर्येण प्रकाश्यत इति शेषः। विद्वज्ज
नस्य पंडितसमूहस्य यत्मनस्तदेव भृंगस्तस्य यो रसव्यासंगः। रसः शृंगारादिस्त
स्य व्यासंग आस्वाद्य संबंधेन व्याप्तिः स एव हेतुस्तदर्थं अनुष्टुप्छंदः॥ २॥ तत्रेति॥
तत्र तस्यां रसमंजर्यां रसेषु हास्यादिषु शृंगारस्य अभ्यर्हितत्वेन प्राधान्येन तदाव
लंबनविभावत्वेन तस्य च शृंगारस्य आलंबनविभावत्वेन नायिका नावत्प्रथमतो
निरूप्यते। यमालंब्य रस उत्पद्यते स आलंबनविभावः। विभावानुभावव्यभिचारि

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संयोगाद्रसनिष्पत्तिरिति भरतसूत्रं। तत्र विभावो द्विविधः। आलंबन उद्दीपनश्चेति।
आलंबनो नायिकादिः। उद्दीपनो घनरववकपंक्तुपवनादिः। नायिकानां बहुत्वा
ज्ज्ञातावेकवचनमत्र समाधानं। ३॥ सा च नायिका त्रिधा। त्रिभिः प्रकारैर्भिद्यत इत्यर्थः।
त्रिःप्रकारमेवाह॥ स्वकीयेति॥ स्वस्येयं स्वकीया। स्वशब्दात्स्वार्थे कद्इति प्रत्ययेन
दंताद्गृहादित्वात् छः। आयनेयीनीति छस्य ईयः। परस्येयं परकीया। जनपराभ्यां कु
क्वेति परशब्दात् कुक्छप्रत्ययौ। समानैव सामान्या सर्वसाधारणेत्यर्थः॥ ४॥ त
त्रेति॥ तत्र नाम्नः स्वामिन्येव पत्यावेव अनुरक्ता अनुरागिनी स्वकीया। अनुरक्ता
स्वकीयाद्युक्तेः क्वचिदननुरक्तायाः स्वीयात्वं स्यात्। अतः स्वामिनीत्युक्तं। कदाचि
त्परगामिन्यां न चाव्याप्तिः। अव्याप्तिरूपलक्षणदूषणं न घटत इत्यर्थः। यथाहि।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
३

लक्ष्यैकदेशे लक्षणस्य प्रवर्तनमव्याप्तिः। अत्र स्वामिसंबंधिनी लक्षिता तस्या एक
देशे एवकाररूपावधारणेन व्यावर्तितपरान्तरक्तत्वरूपे लक्षणस्याप्रवर्तनरूपा
मव्याप्तिं प्रतिपादि। कश्चिदनुसंदधाति सा न मंतव्या। यतः परगामिन्यास्तत्रालक्ष्यत्वा
त्। एतदेव स्पष्टयति। अत्रेति। अत्रास्मिन्लक्षणे पतिव्रताया एव लक्ष्यत्वात्। नान्य
स्याऽन्ययोगव्यवच्छेदार्थ एवकारः। तस्याश्च पद्मिनी तत्वेन स्वामिसंबंधिनीत्वं परगा
मितया परकीयात्वमपि समायाति। अतः पतिव्रतेत्युक्तं। १॥ सा किंव्यापारेत्यत
आह। अस्याः स्वीयायाश्चेष्टा व्यापारः। तामेवाह॥ भर्तेत्यादि॥ भर्तुः पत्युः शुश्रू
षा परिचर्या शीलस्य सद्वृत्तस्य संरक्षणं आर्जवं ऋजोर्भावः सरलत्वं। क्षमा शांतिः।
शुचौ वृत्तचरिते शीलमित्यमरः। शीलं स्वभावे सद्वृत्त इति विश्वः। २॥ यथेति॥ तामेव

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेष्टामुदाहरति॥ गतागतमिति॥ कुलनतभ्रुवां यः सदाचारवान् वंशः कुलइत्य
भिधीयते। कुलसंबंधिनीत्वात् नते नम्रे भ्रुवौ यासां। कुलनतभ्रूशब्देनात्र पतिव्र
तागम्यते। तासां नयनयोः गतागतकुतूहलं गतं प्रेरणं आगतं आकुंचनं तद्विष
यं कुतूहलं कौतुकं अपांगावधि। अपांगौ नेत्रयोरंतौ तदवधि तत्परिछिन्नं। अपांगौ
नेत्रयोरंत इत्यमरः। पुनः। ईषद्धास्यं अधर एव विश्राम्यति नमुखं व्याप्नोतीत्यर्थः।
ईषद्विकसितैर्गंडैः कटाक्षैः सौष्टवान्वितैः। अलक्षितद्विजं हास्युक्तमानां स्मितं स्मृतं।
पुनः। वचो वचनं प्रियतमस्य श्रुते रेव एकस्य कर्णस्यैव न द्वयोरतिथिर्गोचरः नान्य
स्येत्यर्थः। पुनः चेत् यदि कदाचित्कालविशेषेण कोपक्रमः कोपारंभः तदा केवलं म
नसि मज्जति लीनो भवति न बहिर्याती त्यर्थः। स्वभावोक्तिरलंकारः। स्वभावोक्तिस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
४

डिंभादेः स्वक्रियारूपवर्णनमिति पृथ्वीछंदः। तल्लक्षणं। जसौ जसजलाव सुग्रहपतिस्च
पृथ्वी गुरुः। ८॥ स्वकीयात्त्विविधात्रिप्रकारा। मुग्धामध्याप्रगल्भा चेतिभेदेन। ९॥ त
त्रेति॥ तास्वित्यर्थः। अंकुराः संजाता अस्येति अंकुरितं तत्त्वयौवनं तारुण्यं यस्याः सा मु
ग्धा। अंकुरितमिति तारकादित्वादितच्। १०॥ ताः स्वरूपेणविभजते। सा चेति॥ अज्ञात
सखीजनेन स्वयं वा यौवनं यस्याः सा। एवं ज्ञातयौवना। अंकुरितं त्व अस्फुटस्फुटो
भयभावेन। विभज्यतेन द्विविधेत्यर्थः। ११॥ तामेव पुनर्विशेषयन्नाह॥ सैवचेति॥ अज्ञा
तयौवनाज्ञातयौवना मुग्धैव क्रमशो यथाक्रमं अज्ञातयौवनाज्ञातयौवनाच। ल
ज्जा। अधार्ष्ट्य। भयं स्वरतस्यापरिचयेनाशंका ताभ्यांपराधीना। तत्प्रधानेतियाव
त् रतिः संभोगक्रीडा यस्याः सैव नवोढेत्यपदिश्यते नवं संभोगंऊढापरया प्रापिते

४

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्पर्थः। नच क्रमशः इत्यनेन विशेष्यविशेषणयोर्यथासंख्येनाज्ञातयौवनालज्जापरा
धीनरतिर्ज्ञातयौवनाभयपराधीनरतिरित्याशंकनीयं तथात्वव्यभिचारात्। प्रत्येक
मुभयव्यापारदर्शनात्।१२। तामेव वस्तुनर्मोपायांतरेण विशेषन्नाह॥ सैवचेति॥ क्रम
शः लज्जाभयपराधीनरतिः। अज्ञातयौवनाज्ञातयौवनाक्रमेण सप्रश्रया। प्रश्रयोवि
नयोनम्रता अंगसंकोचनमिति यावत्। तत्सहिताविश्रब्धनवोढेत्यपदिश्यते।१३। अ
स्यानवोढायाश्चेष्टाव्यापारः। तामेवाह॥ क्रियाक्रियेति॥ क्रियाव्यापारस्तद्विषये याह्रीः
लज्जा तयामनोहरा। कोपेमार्दवं। अल्पापनेयत्वं। नवविभूषणे नूतनालंकारे समी
हा इच्छा।१४। मुग्धायथा। अंकुरितयौवनायत्स्वरूपा तामेवोदाहरति। आज्ञप्तमिति॥ का
मदेव धरणीपालेन कामश्चासौ देवश्च स एव धरणीपालो राजा तेन किलेति स्मरणे नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
५

द्भुरिणेवा। आक्रांतं। तारुण्यसहायेन मंत्रिरूपेणाहमपि समरसंज्ञगतज्जेष्यामीत्यवबोधि
तं। एतेन कामतारुण्ययोर्बंधुताव्यज्यते। तदेवाह। शुभेकाले समये तारुण्ये यौवनं कर्तृ
एणीदृशो मृगनेत्र्याः तनौ गात्रे वस्तुं स्थातुं वास्तुविधिं विधास्यति। करिष्यति इति हेतो वि
न्यध्याहारः। दृशां खंजनानां चातुरी। मुखस्य रुचा कांत्या सौधाधरी। सुधाधरश्चंद्र
स्तस्येयं माधुरी। किंच। वाचा सुधासमुद्रलहरीणां लावण्यं मनोहरत्वं आमंत्र्यते।
इति दृष्ट्यादिषु सर्वत्र संबध्यते कामतारुण्याभ्यां स्थितिर्विधीयत इति। भवद्भिरप्याग
त्य तत्र स्थातव्यमित्याकार्यत इत्यर्थः। लावण्यलक्षणं यथा। मुक्ताफलेषु छायायास्
तरलत्वमिवांतरा। प्रतिभाति यदंगेषु तल्लावण्यमिहोच्यत इत्यादि। शार्दूलविक्री
डितं वृत्तं। ।९।। एवं सामान्यरूपां वयःसंधिरूपेणोदाहृत्य संप्रति विशिष्टामुदाहरति।

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अज्ञातयौवनायथेत्याह॥ नीरान्नीरमिति॥ शशिमुखीचंद्रमुखीनायिकानीरान्नी
रंतटं उपागता समीपं आगता सीम्निमर्यादायांस्फुरती नेत्रे ययोः तयोः श्रवणयोः किं
इदंउत्पलंनीलकमलंलग्नंइति ज्ञात्वं श्रोत्रेकर्णेकरंन्यस्यति। नितरांक्षिपति। वामद
क्षिणविभागेनेति भावः। आकांक्षापूरकत्वेनोक्तपोषकत्वात्क्षेत्र इति नपौनरुक्त्यं॥
उत्पलदृगंचलयोः समानधर्मत्वेन वितर्क इति भावः। किंच। शैवालस्य जलनीला
अंकुरास्ते घांघांकया भ्रमेण समानगुणत्वात्। रोमावली रोमोद्गमपंक्तिं प्रोंछति।
पुनः अहंभ्रांता अस्मिभवामिइति सखीमुख्यः पृच्छति। संशयालंकारः। तथा चकाव्य
प्रकाशे॥ ससंदेहस्तुभेदोक्तौ तदनुक्तौ च संशय इति स्पष्टत्वान्नीत्यर्थः। जलनीलीतु
शैवालमित्यमरः। तथा अविदितो ज्ञातः श्रोणीभरो यया सा। शार्दूलविक्रीडितं छं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
६

नं ।१९॥ सख्या ज्ञातयौवनामुदाहरति ॥ स्वयंभूरिति ॥ काचित्सखी सखीं परिहसंत्याह।
हे अंभोजलोचने त्वत्पयोधरः पयो न धरतीति त्वत्कुच इत्यर्थः। यथाश्रुतव्याख्याने रस
हानिप्रसंगः। स्वयंभूः स्वयं भवतीति। शंभुः शं सुखं भवत्यस्मादिति। कस्य धन्यस्य भाग्य
वतः नखेन चंद्र इव चंद्रः चूडायां शिरसि यस्य स भविष्यति। शंभुरपि चंद्रचूडो भवति।
चंद्र इति चदि आह्लादने इत्यस्य धातोस्तेनाह्लादकत्वं व्यंजितं। चूडा इव चूडेति कुचोप
रितननीलिमा ध्वन्यते।२०॥ सैव क्रमशः इति लक्षितां नवोढामुदाहरन्नाह। नवोढा
यथा। हस्ते धृतापीति॥ हस्ते धृता। न केवलं वागाद्यवरुद्धा शयने शय्यायां विनिवे
शितापि स्थापितापि। न केवलं करग्रहणं विना। क्रोडे भुजांतरे कृतापि आलिंगना
दिव्यापारं प्रापितापि। न केवलं स्थापिता। तथापि नववधूर्नवोढा बहिरेव गंतुं याति

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतते यत्नं करोति। लज्जाभयपराधीनत्वादिति भावः। अयेत्यर्धान्तरे। जानीमहे वयं।
यः पुरुषः करेण पादं स्थिरयितुं स्थिरीकर्तुं क्षमते समर्थः। तस्य वक्ष्या आक्रमणी
या। पादाक्रमणमपि रसज्ञेन भवतीत्यत्रापि तथैवेत्यर्थः। स्थिरयितुमित्यत्रातिदे
शिकत्वानित्यत्वात् स्थिरस्यस्थादेशाभावः। स्थगयितुमिति वा समीचीनः पाठः। अ
त्र स्वभावोक्त्यनुगतो दृष्टान्तालंकारः। वसन्ततिलकं वृत्तं। तल्लक्षणं। ज्ञेयं वसन्ततिल
कं तभजा जगौ गः। ९८। विश्रब्धं नवोढा स्वदाहरति। दरेति। नवोढा विश्रब्धेति शेषः।
कस्य रसिकस्य समीपं उपेत्य मिलित्वा स्वपिति। कथमित्याह। दरं ईषत् मुकुलिते मु
कुलीकृते नेत्रपाल्यौ यस्याः क्रियायां न घृष्टा स्यात्। तथा। ईषदर्थे दराव्ययमित्यमरः।
अनतिलज्जिता दृष्टिर्नात्र मुकुलिता तस्या आनंदविधानात्। तथा सति मध्या प्रगल्भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
७

स्वभावेन मुग्धायामसंभवात्। नाप्यर्द्धमुकुलासुरतविशेषेणैतस्याः संभवात्। नापिभी
ता। भीतायां दृष्टौ मुकुलितत्वमित्यसंप्रदाय इत्यलं विस्तरेण। पुनः नीवी नियमितबा
हु। नीव्यां नियमितः स्थापितो बाहुर्येन। तथा कृतः कुचयुग्मस्य बंधः परस्परलग्नता
यत्र। तथाकरेण कलितं धृतंऊरुस्थलं यत्र। स्वभावोक्तिरलंकारः। नारीकट्यंमुकश्च
यौ नीवीस्यादितिवैजयंती। पुष्पिताग्रा वृत्तं। तल्लक्षणं अयुजिनयुगरेफतो यका
रो युजितु नजौ जरगाश्च पुष्पिताग्रा। ९८॥ अथ मध्यामाह। समानेत्यादि॥ समानोढ
लबलतया लज्जामदनौ यस्याः सा मध्या नायिकेत्यर्थः। एषैव चातिप्रश्रयादतिवि
श्रब्धनवोढेत्यपपाठः। अनुदाहृतत्वात्। असंभवाच्च यादृशी अति धार्ष्ट्यभाववती
तस्यां कथं धार्ष्ट्यप्रयुक्तवक्ष्यमाणमध्याव्यवहारसंभव इति। अस्या मध्यायाश्चेष्टा

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रियाव्यापारः। सागसि सापराधे प्रेयसि कांते सति। धैर्ये धीरतायां वक्रोक्तिः। अर्था
तरज्ञापकं वचनमित्यर्थः। अधैर्ये अधीरतायां परुषा निष्ठुरा वाक् यस्याः सा॥ २०॥
मध्यायथा। स्वाप इति॥ स्वापे निद्रायां प्रियस्याननविलोकनहानिः विलोकनरूपे इष्टभं
गोभावीत्यर्थः। तथा स्वापच्युतौ निद्रात्यागे प्रियकरस्य ग्रहणप्रसंगः। इत्यर्थे चेष्टये
तिभावः। इत्थं अमुना प्रकारेण सरोरुहमुखी परिचिंतयंती स्वापं निद्रां विधातुं क
र्तुं लज्जात्यागस्य दुःकरत्वादिति भावः। हातुं त्यक्तुमपि। कांतमुखावलोकनहाने
रनुपेक्षत्वादिति भावः। प्रपेदे प्राप्ता। उभयकोटि अवलंबनानिष्टकार्यद्वयसमान
पतनेन व्याकुला बभूवेत्यर्थः। अत्र च विधानहानिभ्यां तुल्यबलतया लज्जामदन
तुल्यवर्णनेन प्रकटमेव लक्षणोदाहरणस्वरूपं। अत्र च हानिविधानयोरन्यत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
८

रनिश्चयाभावेन संदेहालंकारः। वसंततिलकं छंदः। २१। अथ प्रगल्भां निरूपयति॥ प्रतिमात्रेति॥ पतिमात्रविषये यः केलिकलापः क्रीडासमूहस्तत्र कोविदा प्रवीणा प्रगल्भा। वेश्यायां बन्धनः कुलटायां स्वैरिण्यां पतिमात्रविषयत्वस्याभावात्। न तत्र तयो वेश्याकुलटयो रतिप्राप्तिः। अस्याः प्रगल्भाया रतिप्रीतिः। अन्योन्यापेक्षया संभोगप्रीतिः। आनंदात् संमोहः विचित्तता अज्ञतेत्यर्थः। २२॥ प्रथमं रतिप्रीति उदाहरणं दर्शयति॥ संस्पृष्टेति॥ वामाक्षी वामं वक्रं अक्षि यस्याः श्रुतिगत विकसत्कमलदिदृक्षयेति भावः। सावसनांचलैः बकुलोत्तया प्रयत्नेनापि नाच्छादितं भवतीति ध्वन्यते श्रवणयो नीलोत्पलं नीलकमलं सूर्योदयविकाशिलात्तस्य निह्नुते आच्छादयति। कमलविकासेन चिह्नेन सूर्योदयं प्रियो मा ज्ञानादिति धियेति भावः। क्रसति। अंबुजिनीपतेः कम

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिनीपतेर्देवस्य सूर्यस्य समुदयं जिज्ञासमाने ज्ञातुमिच्छति सति। अंबुजिनीपतेर्वि
नितत्वस्य नाथत्वात्तस्या इति भावः। सूर्योदयं जिज्ञासमान इति रतेरंतरायभूतो दिवा
संभोग इति भावः। न दिवा मैथुनं कुर्यादिति वाक्यात्। किं कृत्वा जिज्ञासमाने प्रिये इत्या
ह। स्तनं संस्पृश्य मर्दनं विधाय वदनं आकलय्य स्वमुखेन चुंबनार्थं संयोज्येत्यर्थः।।
कंठस्थलं संश्लिष्य आलिंग्य एतदालिंगनं दुग्धजलाभिधानं जघनोपश्लेषाख्यं वा
वगंतव्यं उक्तं च। अंके स्थिता च शयने मृगशावकाक्षी गात्रे प्रियस्य विशतीव नितांत
रागात्। गाढोपगूहनवशेन निरंतरं यत्संश्लेषमाहुरिह दुग्धजलाभिधानं। उरु
कलिततदीयश्रोणिरस्योपरि यद्व्रजति यदिह नारी स्रस्तकेशोत्तरीया। करजद
शनकृतं चुंबनं वा विधित्सुः कथयति जघनोपश्लेषमेतन्मुनींद्र इति। तथा अध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
२

रबिंबं निःपीड्य। पीडः पान इत्यस्य त्यपि रूपं। अंबरं अपाकृष्य दूरी कृत्य। अलकं मु
दस्य उत्क्षिप्य। एवं बाह्य रतेनालिंगनादिना नायिका मुत्कंठयितेत्यर्थः। उक्तं च। मो
हनं नारभेत्तावद्यावन्नोत्कंठिता प्रिया। अन्यथा नसुखोत्पत्तिरष्टौ तेर्क कराइवेति। ए
हूल विक्रीडितं वृत्तं॥ २२॥ आनंदात्संमोह इति द्वितीयं उदाहरणं दर्शयति। नखक्षतमि
ति॥ काचिन्नायिका पूर्ववृत्तनष्टिक्षां सखीं कथयति। हे आलि सखी उरस्थले वक्षसि
नखक्षतं। अधरतले अधराधः प्रदेशे रदस्य दंतस्य व्रणं। तलं स्वरूपाधरयोरिति वि
श्वः। बकुलमालिका बकुलस्य वृक्षस्य पुष्पं बकुलं तस्य मालेव मालिका च्युता इत
स्ततः पतिता। च पुनः मुक्तावली विगलिता। मुक्ताहारस्त्रुटित इत्यर्थः। प्रागल्भ्यप्र
युक्त सुरतवैचित्र्य सुभयत्रापि हेतुरिति भावः। एतत्तु नखक्षतादिकं सकलं रतांत

२

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समये सुरतांतकाले आनंदभरत्वेपि मया आलोकितं ईषद्दृष्टं। तत्र च स्मृतिः। क्वच
अयमहमिति विशेषस्मरणं क्वेत्यर्थः। रतिः क्वच। विशेषसंभोगः क्वनस्सरामीत्यर्थः।
तत्र च भवत् शिक्षाविधिर्नायके एवं व्यवहर्तव्यमेवंनेति विशेषविषयकः क्वच किमपि
नज्ञानामीत्यर्थः। इत्थं नियंतंकालं संभोगमात्रस्फूर्तौ सुरतवैचित्र्यमनंतरं च तद
भावेति संमोह इति प्रगल्भायां रतिवैचित्र्यसंमोहाववगंतव्यौ। अन्यथा प्रियसंस्पर्शेण
वातिसंमोहे कदा सुरतवैचित्र्यं स्यात्तदभावे च रसहानिप्रसंगः अतस्तदुभयमपि
युज्यत इति भावः। पृथ्वीछंदः। २४॥ इत्थं निरूपितेषु स्वीयामुग्धादिभेदेषु मध्याप्रगल्भे
भेदांतरैरनेकविधे इत्याह। मध्याप्रगल्भे इति मानावस्थायां मानप्रधानत्वे प्रत्येकं
त्रिविधे। मध्याप्रगल्भे त्रिप्रकारे इत्यर्थः। तानुप्रकारान्दर्शयति। धीराधैर्यवती॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
१०

अधीरा अधैर्यवती। धीरा धीरा धैर्या धैर्यवती। तत्र धीरान्दर्शयति। व्यंग्येति। व्यंग्यो
तु मेयः केन चित् चिह्नेन कोपस्य प्रकाशो यस्याः सा धीरा। नव्यंग्यः कोपप्रकाशो यस्याः
सा अधीरा। व्यंग्या व्यंग्यः कोपप्रकाशो यस्याः सा धीराधीरा। इयांस्तु विशेषः। इद
मेव चिह्नं मध्याधीरायाः कोपस्य व्यंजिका गीर्वाक्। कोपस्य व्यंजिकेति शेषः। मध्या
याधीराधीराया धैर्या धैर्यवत्याः वचनं धीरत्वयोगि। रुदितं अश्रुविमोचनं अधी
रत्वयोगिते उभे एककालीने इति शेषः कोपस्य प्रकाशके॥२९॥ प्रगल्भापितथै
वेत्याह। प्रौढायाः प्रगल्भायास्तु धीराया रतौदास्यं सुरतौदासीनत्वं। कोपप्रकाश
कमिति योज्यं। बालास्यात्षोडशाब्दान्तदुपरि तरुणी त्रिंशतिर्यावदूर्ध्वं प्रौढा स्यात्पं
चपंचाशदवधिपरतो वृद्धतामेति नारी तिरति रहस्ये। प्रगल्भाया अधीरायास्तु

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्जनं वाग्नेत्रशिरःकंपादिभिः। ताडनादि। ताडनं पुष्पमालादिना। आदिना तद्बंध
नमपि। प्रगल्भा या धीराधीरा या रतौदास्यं स्वरतौदासीनत्वं तर्जनताडनादिके को
पस्य प्रकाशके पूर्ववत्। एवं धीरादिभेदानुक्त्वा प्रासंगिकत्वात्परमतमनूद्य निराक
रोति। धीरादिभेदः स्वीयाया एव न परकीयाया इति प्राचीनानां लेखनं तैर्लिखितं आ
ज्ञामात्रं न विचारणीयं। यतः धीरत्वं अधीरत्वं तदुभयं धीराधीरत्वं माननियतं मा
नाधीनं प्रस्वते किमागतं। तत्राह। परकीयाया मानश्चेत्तदा तेषामपि आवश्य
कत्वात् निश्चितं भवतीत्यर्थः। मानश्च न परकीयाया इति वक्तुं अशक्यत्वात्॥२६॥
तत्र मध्याधीरामुदाहरति। लोलेति॥ काचित्सापराधं प्रियं प्रत्याह। भोः प्रिय भवतो
देहे श्रमवारिधाराः श्रमजलकणाः स्फारा बहुला बभूवुर्जाता इत्यर्थः। कथंभूत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
११

समभवतः। लोलालिपुंजे लोलानां चंचलानां सतृष्णानां वा अलीनां भ्रमराणां पुंजः समूहो यस्मिन्। भवदंगसौगंध्यमाघ्रायेत्यर्थः। तस्मिन् निकुंजे व्रजतो गच्छतः। अतः नलिन्याः कमलिन्या दलेन तस्यातिशीतलत्वात् समीरं वायुं धीरं मंदं श्रमपरिहरणाक्षममित्यर्थः। विधाय कर्तुं समीहे इच्छामि। लोलश्चलसतृष्णयोरिति विश्वः। मां विहाय निकुंजे व्रजत इति वक्रोक्त्या सापराधत्वं। अत्र वक्रोक्तिरलंकारः। वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थांतरकल्पनमिति। इंद्रवज्रा वृत्तं। स्यादिंद्रवज्रा यदि तौ जगौ गः। २०॥ मध्यामधीरामुदाहरति॥ जा तस्त इति॥ काचिन्मानिनी सापराधं कांतं प्रतिरे धूर्त अतिचित्रमेतदाकर्णयतामित्याह। तेतव निशि रात्रौ जागरो जागरणं जातः। मदन्यनायिकारतिवशादिति भावः। ममतु नः नेत्रांबुजे शोणिमा। शो

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णस्यभावः रक्तत्वं। नदसहनत्वादमर्षग्रहणेतिभावः। यस्यजागरणान्नेत्ररक्तत्वंयु
क्तमत्रतुविपर्ययइतिचित्रं। पुनः। भवतात्वयाप्रविततं अतिशायितं मधुमद्यं निःपी
तं नितरां पीतं मदनस्यया सहेत्स्पर्धः। मे मनोव्याघूर्णितं भ्रांतं। चित्रमेतत्। पुनः। आ
स्यंतोयेभृंगास्तैर्घनेनिविडे। निकुंजभवनेलतागृहे त्वयाश्रीफलं श्रीफलस्यबिल्व
वृक्षस्यफलं। अवयवरूपंफलं। लब्धं प्राप्तं। मदनस्यास्याः कुचलक्षणंफलमितिध्वनि
तं। अविवक्षितवाच्योयस्तत्रवाच्यं भवेद्ध्वनौ। प्रायेणपादपस्तृक्षेभ्यइत्यमरः फलेत्वणि
तित्वकू। यद्वा। श्रियस्तस्यायौवनसंपत्तेः फलमिवफलं कुचरूपं। तत्संभोगादिव।
पुनः इदंचित्रं। एषः पंचेषुः। पंचइषवोबाणायस्यसः कामः। मांकृतवहोग्निस्तद्वत्
क्रूरैर्दाहकैः शरैः कृंतति। छिनत्ति। फलंत्वयाप्राप्तं संछेदनं ममेति वैपरीत्यमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्पर्थः। हर्षणाश्च प्रहसनो मोहनो मूर्छनस्तथा। विद्रूपणास्य कामस्य शराः पंच प्रकीर्तिताः। यद्वा। अरविंदमशोकं च चूतं चंपककोरकं। नीलोत्पलं च पंचैते पंचबाणस्य सायका इति। एतेन स्वयं फलं प्राप्यादृष्टैः प्रतारिता इति भावः। अत्र विरोधालंकारः। विरोधः सो विरोधे पि विरुद्धत्वेन यद्वदेदिति। शार्दूलविक्रीडितं वृत्तं। २०॥ धीराधीरसध्या ख्यदाहरति। कांतानुरागेति॥ काचिद्वदति। भोः कांत अनुरागोनुरंजनं तच्चंचतुरो सि। यद्वा। कांताया मदन्यस्या अनुरंजनं। न केवलमनुरंजनचतुरः किं तु मनोहरो सि तस्याः। मम तु मनो अहरसि न हरसीति वक्रोक्तिः। तस्यामासक्तेः न केवलमिदमेव। नाथो सि प्रभुरसि। उपतापको सीति वक्रोक्तिः। नाष्टनाद्य याञ्ञोपतापैश्वर्याशीःषु। किंच। नवयौवनेन भूषितो सि। इदमेव भूषणं न विनयादीनि इति वक्रोक्तिः। स्वदृशा ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यिकया। इत्थं एवं निगद्य उक्त्वा प्रियस्य वदने। विषये सप्तमी। निःश्वस्य। बाष्पैर्नेत्रांबु
भिर्लुलिता विमर्दिता दृगंता दृक्कोणाः निहिताः प्रेरिताः। अत्र वक्रोक्त्यश्रुपाताभ्यां
धीराधीरत्वं स्पष्टमेव। वसंततिलकं छंदः। २९॥ प्रौढाधीरा यथा तथा नायमुदाहरति।
नोतल्पमिति॥ काचित्सखीं वदति। हे केतकगर्भगौरि। केतक्याः पुष्पं केतकं तस्य
गर्भस्तद्वद्गौरि। तल्पं शय्यां नो भजसे। तथा। तथा सुधाधारानुकारः सुधाधारां अ
नुकुर्वंतीति ताः। अमृततरंगतुल्या इत्यर्थः। गिरो वाचो न जल्पसि। उभयमपि कोपो
दयादिति भावः। तथा कोपप्रकाशस्य छलात् व्याजात् परिजने हस्तपातं न करुषे।
इत्थं एवं दयिते प्रिये तत्कोपस्य संगोपनं आच्छादनं स्यादेव। चेत् यदि पुनः सहचरी
सहचरतीति सखी। साचिवक्रमुखं कृत्वेत्यर्थः। स्मितं न कुर्वीत। एवमुदासितायां त्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
१३

यिचाटुवचनादि कुर्वतो वल्लभस्य सखीसाचिस्मितमेव त्वत्कोपख्यापकमभूदित्यर्थः। सा
चित्वक्केश्ववत्कुसुमिस्मितइत्यमरः। शार्दूलवृत्तं। २०॥ प्रौढामधीरामुदाहरति। प्रतिफ
लमिति॥ अचलकन्या पार्वती गिरिशं गिरिं पशुपतिं तं नूकरोति स्वतेजसा एवंभूतं ई
श्वरं करेण तर्जयामास। चित्रमेतत्। किंभूता पार्वती। हरस्य शिरसि या इंदोः कला
तस्यां स्वीयं प्रतिफलं प्रतिबिंबं अवलोक्य परस्या अन्यस्या वा संस्थितिं आशंकमा
नावितर्कयंती। किंभूतेन करेण। कंपेन प्रचलानि प्रकर्षेण चलानि चंचलानि या
नि वलयानि कंकणानि तेषां वल्गंती भाषमाणा या कांतिः शोभा तां भजतीति भाजा
सेवमानेन। अन्योपि यथा डुंधुनि पूर्वेण तर्जयति तथेत्यर्थः। अत्र संशयालंकारः।
मालिनीवृत्तं। तल्लक्षणं। ननमयययुतेयं मालिनी भोगिलोकैः॥ २१॥ धीराधीरांप्रौ

१३

25

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णमुदाहरति। तल्पोपांतमिति। प्रियतमे तल्पोपांतं तल्पस्य शय्याया उपांतं समीपं उ
पेयुषि प्राप्तवति। वक्रीकृतग्रीवया सा पराधस्या स्वसन्मुखं स्थितिर्नोचितेति भावः। पुनः।
काकुव्याकुलवाचि। काकामन्यपराधं ज्ञात्वा कुपितेति भीतियुतध्वनिविकारेण व्या
कुला अन्यथाकथनेन वा कुयस्य तस्मिन्सति। साचितिर्यक्कृत्वा यत्र हसितं कथ
मपराधगोपनं काकाकरोतीति निहासः। तेन स्फूर्जती विकसंती कपोलयोः श्रीर्यस्याः
सा तया। पुनः हस्तेन्यस्तः करो येन तस्मिन्सति यदिमं हसंती लक्ष्यते नः प्रसन्नेति।
ज्ञात्वा मृगदृशा दृष्टयो दृष्टिभेदाः स्वदपराधसूचकरूपाः विस्फारिताः सक्रोधप्र
काशं प्रेरिताः। कथंभूता दृष्टयः। लाक्षारसेन यावकेन क्षालितं यत्प्रोक्षुः श्राफ
र्णीः स्पष्टं तस्य येन घृणः काः कांतिच्छटा सद्भ्रंशासलाः पृथुलाः रुचोदीप्तयो यासां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०टी०
१५

ताः। काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः। प्रोष्टीतु शफरी द्वयोरित्यमरः। प्रा
र्थूलदृष्टतम्। ।५२।। एवं धीरादिषड्भेदानुक्त्वा तानपि प्रकारांतरेणाह। एते चेति। षड्भेदा
मध्याप्रौढाविषयाः द्विधा प्रकारेण भिद्यंत इत्याह। ज्येष्ठाकनिष्ठा चेति।। परिणीतत्वे
सति भर्तुः स्नेहकृतं ज्येष्ठाकनिष्ठात्वं न तु वयःकृतमिति तत्र स्नेहतारतम्येन अधिक
स्नेहाश्रितादिषु नातिव्याप्तिः। तासां अपरिणीतत्वादित्यर्थः।। ५३।। धीराज्येष्ठाकनि
ष्ठा च यथा तथोदाहरति।। एकस्मिन्निति।। कोपि दक्षिणो नायक इति योज्यं। सकेरु
हद्दृशोर्नायिकयोः एकस्मिन् शयने एकस्यां शय्यायां निद्रां विज्ञाय तयोर्मध्ये एकां
नायिकां पल्लवितो विलासितः अवगुंठनपटो यस्यास्तां तथाकृत्वेति शेषः। मामियं
द्रक्ष्यतीति भिया उत्कंधरः। उत्कंधरा ग्रीवा यस्य एवंभूतः सन् दृष्टवान्। ततः अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यस्याः ज्येष्ठायाः सविधं समीपं समेत्य आगत्य निभृतं मंदं व्यालोलाश्चंचला याहस्तां
गुलयस्तासां व्यापारैः प्रेरणरूपैः वसनस्य अंचलं प्रति चपलयन् स्वापच्युतिं नि
द्राभंगं कृतवान्। तया सह विरं सया तथाकृतवानित्यर्थः। निभृतेति तस्याः श्रवण
शंकयेति भावः। अत्र पूर्वार्द्धे वल्लौत्कंठ्याभावान्न्यूनस्नेहत्वं न कनिष्ठात्वं। उ त्त रार्द्धे व
ल्लौत्कंठ्यात् स्नेहाधिक्यं स्पष्टमेवेति। शार्दूलवृत्तं।३४॥ अधीराज्येष्ठा कनिष्ठा च त
योदाहरति॥ अंतरिति॥ कोपि दक्षिणनायक इति शेषः। घनेकानने रतिकेलियो
ग्ये निविडवने प्रियतमे द्वे पश्यन्। किंभूते। अंतः कोपकषायिते। अंतर्मनसि यः को
पस्तेन कषायिते कलुषीकृते तत्र तयोर्मध्ये एकां कुष्युस्य अवचयाय चोटनाय नम्र
वदनां समायोजयन्। पुष्पावचयव्याजेन नम्रमुखीं कुर्वन्नित्यर्थः। अन्यां ज्येष्ठां नव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
१९

वधूं नवयौवनां नायिकां समालिंगति। किंभूतां। अन्यां। अर्द्धं उन्मीलिते ये लोचने तयोर्ये अंचले कोणौ तयोर्ये चमत्काराः तैरभिरामं आननं यस्याः सा तां। अत्रार्द्धमुकुलादृष्टिः। यथा। अर्द्धव्याकोशिते किंचित् भ्रमंत्यौ तारके स्फुटौ। यत्रार्द्धमीलितौ सार्द्धमुकुला चैव सा स्मृता इति। पुनः स्मेरं अर्द्धं यस्मिन् एवं भूतोऽधरपल्लवो यस्याः सा तां। अत्रापि पूर्ववत् पूर्वार्द्धोत्तरार्द्धयोः कनिष्ठाज्येष्ठाविभागः। शार्दूलविक्रीडितं वृत्तं ॥ २५ ॥ धीराअधीराज्येष्ठाकनिष्ठा यथा तयोदाहरति ॥ धैर्याधैर्येति॥ प्रियः कांतः एणीदृशोर्मुष्टिद्वये अनंतकांत्या रुचिरं रत्नद्वंद्वं न्यस्तवान् किमर्थं प्रीतये तयोरेवेत्यर्थः। किंभूतयोः। धैर्यं अधैर्यं च धैर्याधैर्ये तयोः परिग्रहेण ग्रहिलयोः। धैर्याधैर्ययुक्तयोरित्यर्थः। ग्रहेरौणादिक इलच् प्रत्ययस्तेन ग्रहिल इति साधनी १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं। किंतु। प्रथमतः एकस्याः कठिनायाः करे रत्नं कलयन् ग्राहयन्। परस्याः अन्यस्या
ज्येष्ठाया हस्ताद्धस्तीत्यस्ययं हस्तेन हस्तेन हस्तेहस्ते वा गृहीत्वेदं युद्धं प्रदत्तनमित्यस्मि
न्नर्थे तन्निमिषान् व्याजात् कुचतटीस्पृशन् आनंदं आविंदति अनुभवति। अत्रस्फुट
एव ज्येष्ठाकनिष्ठोदाहरणत्रये। छलमलंकारः। छलमन्यानुरोधेन मुदायस्यप्रका
शनमिति। शार्दूलविक्रीडितं वृत्तम्॥ ३९॥ इत्थं उक्तरीत्या स्वकीयां निरूप्य संप्रति
परकीयां निरूपयति॥ अप्रकटेति॥ अप्रकटः केनापि न ज्ञातः इति भीत्या पर
स्मिन्पुरुषे अनुरागो यस्याः सा परकीया। अप्रकटपुरुषानुरागे त्वुक्ते मुग्धायामः
तिव्याप्तिः। अत उक्तं परपुरुषेति। प्रकटपरपुरुषानुरागे त्वुक्ते वेश्यायां। अतोऽप्र
कटेति सा च द्विविधा द्विप्रकारा। परोढा परेणान्येन ऊढा परिणीता। कन्यका च। न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
१६

नु परोढाया भर्त्राद्यधीनत्वे परकीयात्वं युक्तं। कन्यकायास्तु कथमित्याह। कन्यकायां
इति। अन्याधीनत्वमेव परकीयात्वे प्रयोजकमिति भावः। सा किं स्वभावात्साध्वित्या
ह। अस्याः सकलाचेष्टा गुप्तैव। अन्यानवलोकितेत्यर्थः॥ ३७॥ परोढायया तथोदा
हरति। अयमिति॥ कापि प्रच्छन्नकामिनी सखीं भंग्यंतरेणाह। हे सखि। ऊरुमश्वरः
कामस्तस्य सेवायै आराधनाय समुचितो योग्यः। अयं विद्यमानः रेवाकुंजः। रेवा
नदी तत्संबंधी कुंजः। लताद्याच्छन्नदेशः। अर्थपोषकत्वादध्याहारोऽप्ययमप्यधातव्यं।
उक्तं च॥ येनाप्नोति परां भूमिं पदद्युंफेऽभिधेयता। तदप्ययं समादेयं पद्यव्याख्याविच
क्षणैरिति। किंच। वेलायां यथाकालं। यद्वा। कुंजमर्यादायां तत्प्रांत इति यावत्। वेला
कालमर्यादयोरपीत्यमरः। दरईषत्‌विदलंत्यो विकसंत्यः एलाः तासां पुष्पाणि

१६

31

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलानि वातेषां परिमलस्तत्संबंधलब्धो गंधविशेषो यस्मिन्। नवेति पाठे। नवोभि
नवो विदलद्देला परिमलो यत्रेत्यर्थः। एवंभूतोयं अनुभूयमान इत्यर्थः। समीरः
वायुर्वर्त्तते इति शेषः। अत एव समीरयति कामिमिति समीर इत्यन्वर्थता। विमर्दो
त्थे परिमल इत्यमरः। किंच। नवजलदविन्यासेन नवीनमेघरचनायां चतुरा। अ
त एव धन्या। भर्तृविरहानयनरूपमंडपकारकत्वेन गुणएपवती इयं प्रवृत्तो विलसं
ती प्रावृड्वर्षाकालः मां आनंदयतीति शेषः। इयमिति विरहिणी वेन सखीं वंधून्यन्ते
हे सखि चेतश्चित्तं पराधीनं परस्मिन्पुरुषे आधीनं तद्गुणविशेषवशीकृतं। न
दप्राप्याद् इमामवस्थां प्राप्तं। किमपि तत्संगमोपायरूपं कृत्यं कर्तुं मृगयते विचा
रयति। शिखरिणीवृत्तं। रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी॥ २८॥ परो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र·टी·
९

छायायमादिभेदैर्बहुत्वे कथं द्विधेत्याशंक्यमानं प्रस्तुतमर्थयन्नाह। गुप्तेत्यादि॥ तत्रापि गु
प्ता त्रिविधा त्रिप्रकारा त्रैविध्यमेव दर्शयति। वृत्तस्वरतगोपनेत्यादि। ३६॥ त्रितयमपि
यथातथोदाहरति। एकेनैव पद्येन स्वस्त्रिति। कापि परपुरुषसंभोगचिह्नानि निह्नु
वाना सखीं वदति। श्वश्रूरिति॥ हे सखि श्वश्रूः कुध्यतु। ननान्दा विद्विषंतु। वा अथवा।
यातरः भ्रातृभार्याः। निंदंतु। तद्वचनाकरणमेव क्रोधादिहेतुरिति भावः। भार्याः स्व
भ्रातृवर्गस्य यातरः स्युः परस्परमित्यमरः। किंतु। तस्मिन्मंदिरे ताभिराहूते गृहेऽस्य
र्षिः पुनः। अन्यवारं मया स्वापो निद्रा नैव विधेयः कर्तव्यः। स्वापविधाने हेतुमाह। आ
खोर्मूषिकस्य आक्रमणाय ग्रहणाय कोणकुहरात्गृहप्रांतदेशात्। उत्फालं
आतन्वती कुर्वती मार्जारी बिडाली खरैः तीक्ष्णैर्नखैः नखैः मेमम कांकां दुर्दशां

९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विडंबनां न कृतवती। अपि त्वया दुर्दर्शा कृतास्तान वज्ञा नैवास्तीति भावः। एतेन द्वत्र
वर्त्तिष्यमाण परपुरुष स्वरतगोपनं कुस्मना कृतमिति। अत्र व्याजोक्तिरलंकारः।
व्याजोक्तिः शंकमानस्य छद्मनावस्तुगोपनमिति। उद्भुर्दूषकोऽप्याख्युः न त्वो स्त्री न
खरोस्त्रिया मिस्मरः। शार्दूलवृत्तम्॥ ५०॥ विदग्धा द्विधा द्विप्रकारा। वाग्विदग्धा
क्रियाविदग्धाभेदेन॥ ५१॥ यथेति। तत्र वाग्विदग्धामुदाहरति। निविडनमेति॥ का
पि संकेतमुपदिशंती प्रत्याह। हे पथिक। अद्य तीव्रे सवितरि सूर्ये सति मध्याह्ने इ
त्यर्थः। तत्र तस्मिन्पूर्वोक्तभूते इत्यर्थः। सरित्तटेन नदीतीरे तव निवासो वसतिः सख
चितो योग्यः। किंभूते सरित्तटे। निविडतमेति। अतिशायेन निविडा निनिविडतमा
ये तमालावृक्षास्तान् मलंते अवलंते इति मल्लिनाथः। मल्लङ् धृतावितिधातुः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
९

ना अमृता वल्ल्यस्य लताः विचकिलाश्च मल्लीप्रभेदास्तेषां राजयः पंक्तयस्ताभिर्विराजित उपकंठः समीपप्रदेशो यस्य तस्मिन्। अथ च। हे विराजित। उपकंठे कंठस्य समीपे। अर्थात्तव मम वक्षःस्थले तव निवासो योग्य इति वाग्वैदग्ध्यं सूचितं। अस्मिन्पक्षे राजंतं पदं। राजत इति राट्। तस्मिन्। स्मृतो विचकितो मल्लीप्रभेदे मदनेपि चेति विश्वः। पुष्पिताग्रा छंदः। ४२॥ क्रियाविदग्धामुदाहरति। दासायेति॥ भवननाथे गृहस्वामिनि दासाय सेवकाय वदरी वृक्षविशेषं अपनेतुं छेत्तुं आदिशति आज्ञापितवतीति तात्पर्यः। हरिणाक्षी चपलनेत्रा संकेतवियोगभीतेति भावः। हेमंते ऋतौ तत्र पानीयस्यातिशीतलत्वादिति भावः। पयसि जलेऽङ्गारं विनिक्षिपति गोपायतीत्यर्थः। एतेन क्रियावैदग्ध्यं। अनुकूलाङ्गारगोपनेन वस्तुना स्वचौर्यरतसंकेतनिकेतगोपनरूपवस्तुध्वनिः। क

९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंधुर्वदरीकोलिः। द्वयोऊगारःखधितिरित्यमरः। आर्य्याभेदउपगीतिछंदः तल्लक्षणं। आर्य्यापरार्द्धतुल्ये दलद्वये प्राऊरुपगीतिं। ४२। लक्षितामुदाहरति। यद्भूतमिति॥ कापि सखीं वदति। यत् भूतं अनुष्ठितं तत् भूतं जातमेवेत्यर्थः। जातस्य वाक्तहस्तेणाप्यनिवर्तनादितिभावः। यत् अविष्टं भूयात्। विरुद्धाचरणस्यावश्यं भावित्वादितिभावः। तदपि अविष्टं भूयात्। सम्पन्नकृपास्वीकुयतइत्यर्थः। अथवा। यत्भवति तत्भवतु नविलंबतामित्यर्थः। कोपिगोपनायासोगोपनविषयकप्रयत्नः विफलो निःफलइत्यर्थः। लक्षितत्वादितिभावः। ४४। ऊलटामुदाहरन्नाह। एत इति॥ काचित्कुलटा वदति। एते अंभोधराः मेघाः। वारिकणान् जलबिंदून् किरंति विक्षिपंति। तदयुक्तमित्याह। यतः पुरुषान् जारान् नवर्षंति। अतोऽनुपयोगिन इतिभावः। किंच॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०टी०
१९

शैलाः पर्वताः साद्वलं हरिततृणं उद्गमंति प्रकटयंति। शिलोच्चयत्वादकारुणिका इति भावः। यतः। एते पुनर्नायकानूजारानून स्रजंति। अपिच। तरवः वृक्षाः परोपकारिणोपि नैते लोकेत्रिषु पिलोकेष्वित्यर्थः। फलानि स्ववने उत्पादयंति। अस्मद्भाग्यविपर्ययेण कल्पवृक्षादयोप्यकारुणिका जाता इति भावः। यतः। जनानूजारानूनैव आरभंते नोत्पादयंतीत्यर्थः। अतः। हे धातर्ब्रह्मनू। त्वया। विश्वसृजा कुलटाहेतोः स्वैरिण्यर्थे किं कृतं न किंचिदपि कृतमित्यर्थः। जाराणां विरलप्रचारत्वादिति भावः। अतः अकातरं यथा स्यात्तथा आलपामि। दीनोपालंभं वदामीत्यर्थः। शार्दूलवृत्तं ॥ ४८ ॥ अनुशयानामुदाहरति। सापि चेष्टाविशेषेण त्रिप्रकारेत्याह। वर्तमानस्थानेत्यादिना। ॥ ४९ ॥ प्रत्येकं एकां एकां प्रतिप्रत्येकं उदाहरणानि। अनुक्रमेण तिसृणामपीत्य।

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रवर्त्तमानस्थाननिघट्टनेनानुशयानामुदाहरन्नाह॥ समुपागतवतीति॥ प्रियवशि
वेतिखेदे। स्मृद्दृशाः। शोभननयनायाः कपोलपाली गंडस्थली तालीदलस्य तालीवृक्ष
पत्रस्यद्युतिं पांडुरां कांतिंलेभे प्राप्तवती। संकेतस्थानविघट्टनविषादेनेतिभावः। क्वस
ति। लवंगलतिकायाः संकेतरूपायाः। लतैवलतिके त्यनुकंपायां कन्नूपत्रपातेनदी
नेवदृश्यत इति युक्तं। तस्यामनुकंपार्हत्वं। तस्याः निपतितानिपत्राणियस्मिंस्त
स्मिन्चैत्रेमासिस्वसंकेतकनाशकेसमुपागतवति प्राप्तवतिसति। आर्याभेदोगी
तिश्छंदः तल्लक्षणं। आर्याप्रथमार्द्धसमंयस्यामपरार्द्धमाहृतांगीति। ४७॥ भावि
स्थानाभावशंकया अनुशयानामुदाहरति॥ निद्रालुकेकीति॥ काचित्स्वसखीं चौ
र्यरतसंकेतप्राप्तिमपश्यंतीमाश्वासयंतीवदति। हेतन्वि। कृशांगिनविधस्वखेदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नम्राप्नुहि। तत्रापिप्रियवसतौक्रियंति वनानिनसंति। किंतुबहूनिभवंतीत्यर्थः। अतः
प्रियतमस्यगृहं याहिप्राप्नुहि। किंभूतानिवनानि। निद्रालवोनिद्राशीलाः येकेकिनः।
प्रशंसायामिनिः। प्रशस्ताकेकावाणीयेषांतेबर्हिणास्तेषां। मिथुनानिद्वंद्वसरूपा
णियेषुतानि। एतेनजनसंचरणराहित्यं। केकीत्यनेनघनवनस्य मेघोदयश्चध्वन
ते। पुनः। कपोतानांपक्षिविशेषाणांपोताबालकाः तैर्व्याधूताः कंपितानूतनामही
रुहाणांवृक्षाणांपल्लवायेषुतानि। एतैर्विशेषणैर्जारविलासिनश्चपलसंभोग
न्नायिकायाः कंठकूजनाधरपल्लवादिधूननंध्वन्यते। व्याजोक्तिरलंकारः। वसंत
तिलकंवृत्तं। ४८॥ स्वेनआत्मनाअनधिष्ठितंयत्संकेतस्थलंतस्मिन्। तस्यगमना
नुमानेनवातिरिक्तांअनुशयानांप्राह। कर्णेकस्यचिनेति॥ राधयामधुरिपुः श्रीकृष्णो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरीक्ष्यते द्रक्ष्यते। किंभूतया। निःपतंती गलंती नयनाभ्यां वारिधारा यस्याः तया। कृतसं
केतेऽनेनागतं मयानागतमिति विषादेनेति भावः। किंभूतो मधुरिपुः। कर्णे कल्पिता र
चिता या रसालमंजरी अहमागतस्त्वनागतेति। राधाविश्वासार्थं सांकेतिकाम्रमंजरी॥
तथा पिंजरीकृतं हरितालीकृतं कपोलमंडलं गंडस्थलं यस्य सः। पिंजरं पीतनं ताल
मालं च हरितालकमित्यमरः। रथोद्धता छंदः। तल्लक्षणं। रान्नराविह रथोद्धता।
४९॥ उदिता यथा तथा नाम्नुदाहरति॥ गोष्ठेष्विति॥ काचित्स्वगृहे वासयितुमिच्छंती पथि
कं वदति। पतिर्भर्ता गोष्ठेषु गोनिवासस्थानेषु तिष्ठति। अहमेकाकिनीमिति भावः। ननांदा
भर्तृभगिनी बधिरा च। पुनः। यातुः भर्तृभ्रातृभार्या यानेत्रद्वयस्य पाटवं पटोर्भावः आ
रोग्यमिति यावत्। नास्ति अंधेत्यर्थः। इत्थं अस्तु नाक्रमेण पथिकं प्रति संकेतोपगर्भस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.दी.
२२

स्त्रीवचनं निशम्य कृत्वा तरुणी नायिका कुचकुंभयोः सीम्नि प्रदेशे रोमांचा एव कंचुकं उदं
चितं ऊर्ध्वगतं आततान। मयायं पांथउपभोगपद इत्यानंदात् विस्तारयति इत्यर्थः। वसंत
तिलकं छंदः।९०॥ परकीयां प्रदर्श्य कन्यकामुदाहरन्नाह। कन्यका यथेति॥ किंचिदिति॥
नृपकन्यका राजकन्या स्वकृतिनं उ एवं तं सव्याजं यथास्यात् किमपि व्याजमाश्रित्येत्य
र्थः। धार्ष्ट्याभावादिति भावः। आलोकने कामाधीनतया विलोकयतीत्यर्थः। किंभूता राज
कन्या। स्फुरंती अंगुलीयकानां मुद्रिकानां त्वरूकांतिर्यस्याः तया अंगुल्या गंडस्थकपो
लस्य कंडूयनं कुर्वाणा कथं विलोकत इत्याह। किंचित्कुंचिता तिर्यक् कृया यथास्यात्। ऊनः सर
ले अकुटिले। साभिलाषावलोकनेनेति भावः। भ्रूवल्ली भ्रूलते यत्र क्रियायां तया किंच सा
चि तिर्यक् स्मितं यथास्यात्। अन्योपदेशेनेति भावः। किंच। प्रांते भ्रांता विलोचनयोर्नेत्र

=कारणादिनिभावः। द्वारयाष्टुं हीरलतायसां
क्रियायोतनं २ =

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योद्धृतिः। कांतिर्यत्रक्रियायां तथा॥ मन्नेत्र पथान्न गच्छत्वयमितिभीत्येत्यर्थः॥ उक्तः। भुजायां पर्यस्तं पतितः तं कर्णोत्पलं यत्रक्रियायां न घथा स्यात्॥ कामवशात्तया कपोलकंडूयनादिति भावः॥ भुजां च गुर्वीमिति माघे। अतः स्त्रीलिंगेपि भुजाशब्दः। शार्दूलविक्रीडितं वृत्तम्। ११॥ एवं परोढानिरूप्य सामान्यवनितां दर्शयति॥ वित्तमात्रेति॥ वित्तमात्रोपाधिकः स कलत्रुरुषाभिलाषो यस्याः सा वित्तमात्रोपाधिकेत्युक्ते परकीयायामतिव्याप्तिः॥ तस्याः कदाचिद्वित्तोपाधिप्रवृत्तित्वात्। अतो मात्रेति। यद्येवं इहाव्याप्तिरित्याशंकमान आह। नन्विति। अग्निमित्रे क्षितिपतौ राजनि अनुरक्तायां ऐरावत्यां वेश्यायां अव्याप्तिर्लक्षणस्याप्रवर्तनमित्यर्थः। तत्र तस्यां वित्तमात्रोपाधेरभावात् इति चेत्। उच्यत इति शेषः। एवंमा वक्त। सापि एतान्तनी काश्मीरहीरादीनां दातरि महाराजे अनुरक्ता। न तु महर्षों तेन अवगम्यते ज्ञायते।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र. टी.
२२

तत्रापि तस्यामपि वित्तमात्रोपाधिरिति ।२३। सामान्यवनितां यथा तथा तामुदाहरति । दृष्ट्वेति ॥ कुरंगी दृशो मृगनेत्रायाः वक्षोजौ स्तनौ परस्परं आश्लेषमिव तनुतः । कुरुत इत्यर्थः किं कृत्वा । प्रांगणस्य सन्निधौ चत्वरसमीपे बहुधनं यस्य तं दातारं अभ्यागतं दृष्ट्वा विलोक्य किंच कुंतलः कुंतलाकृवाः संति अस्मिन्न् संयतत्वेति कुंतलो धम्मिल्लः । अर्शादिभ्योत्र प्रत्ययः मालायामिषान्न्याजात् आनंदो हर्षः धनप्राप्त्येति भावः । तेन अस्रुपयांसि अस्रु बिंदु यि च विसृजंति । आनंदास्रुकणां स्वच्छत्वात् पुष्पमाभ्यां किंवा दृष्टिः धनागमं धनप्राप्तिं कथयितं कर्णांतिकं कर्णसमीपं गच्छति । धनागमानंदादिति भावः । श्रा दूलविक्रीडितं वृत्तं ।२४। एवं स्वीया परकीया सामान्यवनिता स्तद्भेदांश्च निरूप्यान्यदपि निरूपयति एताः हर्षोक्ता । अन्यसंभोगे भोगेन दुःखिताः । वक्रोक्तिभिर्गर्विताः मानवत्यो मानयुक्ताश्चेति

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तः।२४॥अन्यसंभोगे नदुःखितायथा॥ त्वं दूतीति॥ हे दूति मत्खेदखिन्नो दुदुन्न उपना

पद्नितिधातोः हूयतइति शुन्या त्वं कुंजं निरगामत्प्रियविरहदुःखतल्पतया दुःखित

मात्मानं स्वखयितुं कुंजप्रदेशं गतवतीत्यर्थः। तद्वनः। पापीयसो विप्रियकारिणोऽस्य

हं न तदानयनं तु मत्सुखार्थं स वान्यया सक्त इति किं तद्गृहगमने नेति भावः। कि

मिदं वदसीति चेत्तत्राह। अन्यथा नैवं चेत्तद्देहे अंगे किंशुकाभरणं कथं दृश्यते स

र्वं मत्प्रियं त्वया संपादितमिति सोपहासं प्रियसक्तवती नखक्षतादिदर्शनेन ना

यिकाया दुःखागमप्रतीतिर्ध्वन्यते किंशुकचिह्नेन कुंजगमनानुमानमित्यनुमाना

लंकारः। अनुमानं तु कार्यादेः कारणाद्यवधारणमिति। स च वक्रोक्त्या व्याजस्तु

त्या च नखक्षतेषु। किंशुकापह्नवेनाव्याजस्तुतिर्मुखे निंदा स्तुतिर्वा रूढिरन्यथेति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
२२

५५॥ वक्रोक्तिगर्विताद्वैविध्यं दर्शयति प्रेमगर्विता सौंदर्य्येणगर्विता च। प्रेमगर्वितोदा
हरमाह॥ वपुषीति॥ काचिदात्मानमधिकं अन्यां सखीं वदति। हे सखि। अत्र तवेति पदस्य
भयत्रयोज्यं काकाक्षिन्यायेन। तव प्रभुः स्वामी तव वपुषि रत्नभूषां तनोतीति हेतोः ध
न्या न मास्मि। स्वाधीनभर्तृकात्वादतिशयेन धन्यासीत्यर्थः। किं ब्रवीमि न किंचित् हीनं व
क्तुं शक्यते इत्यर्थः। तथाऽहमित्याह। मे कांतः विभूषणानि न कलयति न धारयति। किं
भूतः। तनुनयनांतरालभीरुः। तनु मम नयनं तदीयं तयोरंतरालं व्यवधायकं तेन
भीरुः। भूषायां मदंगांतरायं जानन्नित्यर्थः। धन्यतमेति स्वाधिक्यकथनाय व्यतिरेका
लंकारः। उक्तं च॥ उपमानादन्यस्य व्यतिरेकः। स एष क इति। पुष्पिताग्राछंदः॥ ५६॥
सौंदर्य्यगर्विताया ये तितां खुदाहरति॥ कलयतीति॥ काचित्सखीं वदति। हे सखि कां

२२

45

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते प्रेयसि किं आचरामि करोमि तत्कथय उपदिशेत्यर्थः। तत्र तस्मिन्कांते सद्दिस्तुतैव ता दृक्कुवाक्यसहनशीलत्वमेव दोषः। समभूनि संजातः। किंभूते कांते। मे अक्ष्णोः कमलोपमानं कमलतुल्यं कयलति कथयति सतीत्यर्थः। पुनः मे वाचि खधारसस्य अमृतद्रवस्य साम्यं समतां प्रथयति प्रख्यापयति सतीत्यर्थः। पुष्पिताग्रा छंदः। ९७॥

मानवती यथेति तामुदाहरति॥ प्रिया परार्धं सूचयतीति॥ सूचिका एवंभूता चेद्मानः। स च लघुर्मध्यमो गुरुश्चेत्याद्युदाहरणपर्यंतं स्पष्टं। उक्तं च रुद्रभट्टे॥ स प्रायशो भवेत्त्रेधा कामिनीनां प्रियं प्रति। अवेक्ष्य दोषमेतस्य गरीयान्मध्यमो लघुरिति॥ ९८॥

अपरस्त्रीदर्शनादिजन्मा यथेति तं मानमुदाहरति॥ खेदांबुभिरिति॥ काचित्सखीं वदति। हे शातोदरि। शातं कृशं उदरं यस्याः सा तत्संबोधनं। प्रिये कांते अन्यां अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
२४

परां नायिकां विलोकयति सति न विलोकनमात्रं किंतु भाषयत्यपि सति। तव मानः क्वक
स्मिन्प्रदेशे पदं चरणं दास्यति तत्पदस्थानं न विद्मः न जानीमः। यतः। एतदंगं क्वचन प्र
देशे खेदांबुभिः पिच्छिलं व्याप्तं। क्वचन प्रदेशे कंटितं संजातकंटकं। उभयत्रापीर्ष्याद
येन खेदरोमांचयुतत्वमिति भावः। चकास्ति शोभते। किमिव हिमधुराणां मंडनं नाकृ
तीनामिति भावः। खेदांबुभिः क्वचन पिच्छलमंगं भूसावित्यपागेऽसमंजसत्वात्। वसं
ततिलकं छंदः। ५९॥ गोत्रस्खलनादिजन्मा यथा तथोदाहरति॥ यज्ञोत्रेति॥ हे तन्वि।
यज्ञो च स्खलनं सपत्नीनामोच्चारणमित्यर्थः। तत्रोच्चारणे यदि श्रमो न मन्यते त्वये
ति भावः। तर्हि रोमालिः रोमश्रेणिः सैव व्यालः सर्पस्तस्य संस्पर्शे तत्प्रकारकशपथं
कारय तद्दोषपरिहाराय शपथं कुर्वंतं प्रेरयेत्यर्थः। अनुष्टुप् छंदः॥ ६०॥ अप

२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रस्त्रीसंगमादिजन्मा यथा तयोदाहरन्नाह। दयितेति॥ स्वदृष्टो नायिकायानयनसे
न्येकस्यैव प्रेक्ष्यसंबंधादेकत्वं। कोपाभासा प्रांतकांत्या श्रुतिसुक्ताः कर्णावतंसीकृत
मुक्ताफलानि शिखिरोपमा दाडिमबीजतुल्या बभूवुर्जाताः। सापराधे प्रेयसि क्रोधे
नेतिभावः। किं कृत्वा। सपत्न्याः चरणालक्तकेन पिंजरं पीतरक्तवर्णं दयितस्य प्रियस्य
भालदेशं निरीक्ष्य तिर्यगवलोक्येत्यर्थः। औपछंदसिकं छंदः। तल्लक्षणं। षड्विषमेष्टौ
समे कलास्ताश्च समे स्युर्नो निरंतराः। न समात्र पराश्रिता कला वैतालीयेंते रलौ गुरुः।
तत्रैवांतेधिके गुरौ स्यादौपछंदसिकं कवीन्द्रहृद्यं। तत्रैव वैतालीये प्रतिपादं अंतेधि
के गुरौ सतीत्यर्थः। ९९॥ प्रासंगिकतया नासां भेदांतराण्निरूपयति॥ एताषोडशेति॥
त्रयोदशविधास्त्रीया। यथा। मध्याप्रगल्भयोः प्रत्येकं धीरादिभेदाः षट्। पुनस्तयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
२५

ज्येष्ठाकनिष्ठात्वेन षट्। एवं द्वादश। मुग्धात्वेकैवेति मिलित्वा त्रयोदश १३ परकीया द्विविधा २ एकावेश्येति षोडश। अष्टावस्थाभिः प्रत्येकं एकंएकं प्रति अष्टविधाः अष्टौप्रकाराः। ता अवस्था आह। प्रोषितेति। प्रोषितो देशांतरं गतो भर्ता यस्याः सा १ खंडिता। अन्यासक्तत्वेन पत्या वियुक्तेत्यर्थः २ कलहेन अंतरिता हतेत्यर्थः ३। विप्रलब्धा। विप्रलंभेन विसंवादेन युता विमनस्केत्यर्थः ४। उत्का उत्कंठितेत्यर्थः ५ वासएव वासकस्तत्र सज्जयति तल्पादिकं सा ६। स्वाधीनः पतिर्यस्याः सा ७ स्वयमभिसरति अभिसारयति वा सा ८। इति एवं गणानात्। स्पष्टं तासां नायिकानामपि उत्तमादिगणनया शतत्रयं चतुरशीत्यधिकयुतभेदा भवंति। तथा च रुद्रः। त्रयोदशविधा स्वीया द्विविधा च परांगना। एका वेश्या पुनश्चाष्टा ऽवस्थाभेदतो मताः। पुनस्त्वताः स्त्रियः सर्वा उत्तमाधमम

२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यमाः। इत्थं ज्ञातत्रयं तासामशीति श्चतुरुत्तरेति। ६२। निराकरणं यमतमनुवद
ति। यत्त्विति। एतासां अनंतरंगाणि तानां दिव्यादित्रयोभयेत्याद्युक्तेनादय इत्यतं स्पष्टं।
यद्यपीति। मुग्धायानायिकाया यथाधीरादिभेदस्याभावः। तथाविधधीरादिप्रकाया
प्रज्ञासामग्रीतस्या अभावात्। तथाऽष्टविधत्वाभावोपि भवितुर्महतियोग्यो भवति।
तथापीति। प्राचीनानां कवीनां लेखनस्यान्तरो धेनाग्रहेण नवोढां लज्जाभयपरा
धीनरूपां मुग्धां अलंब्याश्रित्य एते भेदाः प्रोषितभर्तृकादयः अवगंतव्याः ज्ञातव्याः।
६३॥ तत्र प्रोषितभर्तृकां दर्शयति॥ देशांतरगतइति॥ देशांतरेति पदेनोक्तादिषत्ति
व्याप्तिं निराकरोति। उक्तेत्यादिस्पष्टं। अस्याः प्रोषितभर्तृकायाश्चेष्टा क्रिया। दशावस्था॥
अभिलाषचिंतादयो वक्ष्यमाणाः। मुग्धाप्रोषितभर्तृकानामुदाहरति। दुःखमिति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
२५

अंकुनस्तु सखीमुग्धायत्नादित्यव्ययं। यतो हे तोः संतापं सहते। ननूनं हं त्वं चेतोभवः कामो वेद
जानाति। दुःख्यत्वादिति भावः। नान्य इत्यर्थः। संतापमेवाह। दीर्घतरं अतिशयेन दीर्घं वहू
त्समित्यर्थः। दुःखं वहम्पपि धारयत्यपि सखीवर्गायसखीसमूहाय लज्जयेति सर्वत्र सं
बंधः। नो भाषते न कथयतीत्यर्थः। पुनः शैवालैः जलनीलीभिस्तृणविशेषैः शयनं श
य्यां सृजत्यपि रचयत्यपि न वाशेते निद्राति। पुनः कंठे गद्गदवाचं स्खलितां गिरं अंच
ति गच्छति प्राप्नोतीत्यर्थः। दृशोर्नेत्रयोर्बाष्पोदकं न धत्ते न दधाति। विशेषोक्तिरलंका
रः। शार्दूलविक्रीडितं वृत्तं। ६४॥ मध्यां प्रोषितभर्तृकामुदाहरति। वास इति॥ काचि
त्सखीं वदति। हे सखि। वपुषो वासो वसनं तदेव अति सूक्ष्ममिति भावः। हस्तस्य वलयं
कंकणं तदेव हस्तयोग्यमित्यर्थः। च पुनः जघस्य वराश्रेष्टा परिमितत्वादिति भा

२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वः। कांचीसैववाचाला बङ्गभाषिणो भृंगास्तैः सुभगे सुरभौ वसंते सति अद्य समस्तं वास
रत्नादि। तेन बाधिकं भवति। विरहवेदनया कृशत्वादिति भावः। किं निदानं किं कारणमिति।
आलज्जाटज्जौ बङ्गभाषिणीति सूत्रेण ऊत्सितार्थे आलच्। अत्र वैरिविषयत्वेनासह्यत्वे
न वा ऊत्सितत्वं। अत्र नर्मस्फोटालंकारः। नर्मस्फोटं स्तुभावानां सूचितात्स्वरसो लवैरि
ति। पश्चान्नितंबः स्त्री कट्याः स्त्रीवेतज घनं परः। वसंते पुष्पसमयः सुरभिरित्यमरः। व
संततिलकं छंदः॥ ६९॥ प्रौढा प्रोषितभर्तृका यथेति तामुदाहरति। मालेति॥ काचित्स
खीं प्रौढां प्रियरहितां सखीं वीक्ष्य वदति। सख्यक्वो नायिकायाः बालांबुजदलमयी बा
लानि कोमलानि अंबुजदलानि प्राचुर्येण यस्यां सा माला। तथा मौक्तिकी। मुक्ताभि
र्निता हारयष्टिर्हारलता। तथा कांचीक्षुद्रघंटिका। विविधः उः खं हारिणि हरौ कुत्से

मे॰टी॰
२०

प्रभवति प्रकर्षेण कर्मयुग्णादिसंपत्त्या प्रभवतीति प्रभवन् तस्मिन्याते गच्छति प्रस्थानं कृतवतीत्यर्थः। प्रस्थितैव कृतगमनैव। कमलदलमालायाः मुक्ताहारस्य च संतापात्। कांच्याः कृशत्वात्। प्रस्थानमिति। अन्यत्किमपि आश्चर्यं ब्रूमः। अहहेति खेदे। धमनी नाडी वर्ततेन वा इति ज्ञातं बाहोर्वलयं पाणिमूलं हृलमूलं प्रयाति गच्छति। अत्र प्रकटमेव प्रागल्भ्यं। नाडी तु धमनी सिरेत्यमरः। मंदाक्रांता छंदः। मंदाक्रांतांबुधिरसनगैर्मोभनौ गौ ययुग्मम्। ६६। परकीयां प्रोषितभर्तृकामुदाहरति। श्वश्रूरिति। श्वश्रूः पतिमाता पत्र दलं ददाति। कौतूहलेनेति भावः। तदपि दलं तया भ्रूसंज्ञया भ्रूसंगसूचनेन गृह्यते स्वीक्रियते। च पुनः। सद्य स्तत्क्षणं यामर्मरशंकाः शुष्कपर्णध्वनिशंका तया स्पर्शमात्रेणैव शुष्केस्मिन्नु दले मम विरहतापं मा ज्ञासीदिति शंकयेत्यर्थः। पाणिना न संस्पृश्यते। किंच। ऊ

२७

रंगी दृशा उक्तं रंगी मृगी तद्वद्दृक् यस्यास्तया। भीत्या चकितदृशेतिभावः। यातः प्राप्तः भार्या
याः वाचि विषये स्वहृदयस्य सखीगणस्यैव यत्सा प्रत्युत्तरं प्रतिवचनं दीयते। किंच। उक्तव
होग्निरूपः क्रूरः श्वासो न सह्यते। पूर्ववत् शंकयेति भावः। अत्र प्रच्छन्न कामित्वं प्रकटमे
व। शार्दूलविक्रीडितं वृत्तं। ६७॥ सामान्या प्रोषितभर्तृकाया येत्युदाहरति। विरहेति॥ द्वार
देशे उपविष्टायाः स्त्रियोषितत्वेषा। इति हेतोः अक्ष्णोर्नेत्रयोर्मध्ये चाना निचयं समूहं न्यस्य
निक्षिप्य बाष्पोदबिंदून्। अस्त्रजलकणाः। विसृजति प्रकटयति। इति किं। कांतः कामी।
अंतर्मनसि स्वस्येत्यर्थः विरहेण विदितं ज्ञातं। मे मम प्रेम स्नेहं विज्ञाय। स्वविषयकं स
त्यं मज्ज्ञात्वेत्यर्थः। तस्मात् देशात् एत्य आगमनेऽत्र न रपि पूर्ववत् व सहद्दुःखं दास्यति। अ
त्रापह्नुतिरलंकारः। मालिनी छंदः॥ ६८॥ अथ खंडितां दर्शयति। अन्योपभोगेति। स्पष्टं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
२८

प्रातरिति कालस्याप्युपलक्षणं न तु नियामकमित्यर्थः। अस्याः खंडितायाः चेष्टाव्यापारः। असकृदालापेतिस्पष्टं। ६९॥ मुग्धाखंडिता यथेति तामुदाहरति। वक्ष इति॥ प्राणेशः पतिः। नवोढस्य दृशः। नवोढा चासौ स्त्री च तस्या नायिकायाः। नयनं नेत्रं पाणिना अपिदधे। आच्छादयत्। किंभूतायाः सुदृशः वक्षः उरस्थलं कलयन्तं किंतं घटचिक्रितं। किमु वितर्के। इति इत्थं किमपि चिक्रादिकं प्रष्टुं इत्यावासलचे नान्यनायिका स्तनाभोगचिह्ने मुग्धत्वात् एकं त्या इत्यर्थः। आर्याभेद उपगीतिः। ७०॥ मध्याखंडिता यथेत्युदाहरति। वक्षोजचिक्रितमिति॥ बालानायिका। नात्र बालाशब्दो मुग्धात्वपरः। किंतु वल संभक्ताविति धातुस्ले नवलने संभजते। धीराधीरात्वं तत्परः। दयितस्य प्रियस्य वक्षोजचिक्रितं अन्यनायिकास्तनचिक्रितं उरो वीक्ष्य दृष्ट्वा दीर्घं अधिकं न निश्व

२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मितेन निर्घृणं प्रति किंविकृतिदर्शनेनेति भावः। किंचिदपि वक्रं न जल्पति। पूर्व एव भावः। किं
तु जलेन प्रातः प्रभाते वदनं परिमार्जयंती। प्रक्षालयंती विलोचनजलानि अश्रूणि ति
रोदधाति स्थगयति। मद्विकृतिदर्शनेनायं विप्रियकृदप्युद्विग्नो न भवेदिति। चातुर्येणे
ति भावः। अपह्नुतिरलंकारः। वसंततिलकं छंदः॥ २९॥ प्रौढखंडिता यथेत्युदाहरति।
मामुद्वीक्ष्येति॥ कोपि नायकः सखायं प्रतिवदति। अंगना नायिका प्रातः प्रभाते करतला
त्। ल्यब्लोपे पंचमी। करतले स्थापयित्वा स्वस्येत्यर्थः। मंगलं मंगलसूचकं। आस्म
रणादिति भावः। आदर्शं आदर्शयत् किं वक्तव्यं। त्वमेव चिह्नान्यवलोक्य स्वापराधं विग
णयेति दर्शयति स्मेत्यर्थः। किंभूता अंगना। विपक्षपक्ष्मलदृशः। विपक्षा सपत्नी सा चा
सौ पक्ष्मलदृक् तस्याः प्रशस्तानि पक्ष्माणि यस्याः सा पक्ष्मला दृक् यस्याः। सिध्मादिभ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
२९

श्चेतिलचू। तस्याःपादांबुजालक्तकैः आलिप्तं आननं मुखं यस्य तं मां। उन्नानकरणादिति भा
वः। उद्वीक्ष्य। उच्चैर्दृष्ट्वा। आनतीकृतमुखी। न पूर्वं आनतं आनतीकृतं नम्रीकृतं यया सा।
विप्रियकारिणो दर्शनाद दर्शनमेव वरमिति धियेति भावः। चित्रार्पिते व चित्रलिखिते व अ
भवत्तज्जाने स्पर्शः। विषादविमूढतयेति भावः। किंच। तूष्णीं नीरसं न उक्तवती वा अथवा। दृ
शौ निश्वासेन कोष्णेर्बाष्पैः किंचिदप्युक्तेन कृतवती। अत्रापि तूष्णीं वक्तव्याद्यभावे पूर्व श्लो
कोक्तएव भावः। शार्दूलविक्रीडितं वृत्तं॥ ७२॥ परकीयाखंडितायथेति तामुदाहरति॥ कां
तमिति॥ मृगदृशा नायिकया वलयांकितकं ठदेशं कांतं कामिनं निरीक्ष्य परभयात् प्रच्छ
न्नकामित्वादिति भावः। परुषाः कठोरा वाचो नोक्ताः। किंतु। तया दूतीमुखे स्खलदंबुपूराः।
स्खलदंबुपूरोऽस्त्र प्रवाहो येषु ते नयनांतपाताः। दूरात् निदधिरे निक्षिप्ताः। खलु तस्य

२९

57

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलवैचित्र्यमवलोकयेति धियेतिभावः। वसंततिलकंछंदः॥७३॥ सामान्यवनिता खंडिता
यथेति तामुदाहरति॥ उरस्तवेति॥ वारस्त्रियावेश्यया इत्युक्त्वा प्रचलचेतसश्चलमनसः
प्रियनमस्यकरतलात्कणात् शब्दायमानं कनककंकणं समाकृष्यते। बलात्गृह्य
त इत्यर्थः। वारस्त्री गणिका वेश्येत्यमरः। इतीतिकिं। नव इदं उरः। पयोधरांकितं अ
न्यनायिकास्तनचिह्नितं। अतः मे कुतः क्षमा। ततो हेतोः। यत्पुरा पूर्वं अंगीकृतं वंव स्वद
र्यं तत् मयि विषये निधीयतां। इष्टौ छंदः॥७४॥ कलहांतरितामुदाहरति। पतिमव
मत्येति स्पष्टं। अस्याः कलहांतरितायाः चेष्टा। भ्रांतीत्यादि॥ भ्रांतिर्मिथ्यामतिभ्रम इत्यम
रः। मोहइंद्रियवैकल्यं स्पष्टमन्यत्॥७५॥ मुग्धाकलहांतरितायथेत्युदाहरति। अनु
नयतीति॥ नवोढा मुग्धा लज्जमाना पतिं लज्जमानमिति योज्यं। कलहे नावमानित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्री
३०

मित्यर्थः। नानुनयति। सखीजनायापि किंचित्कर्णव्यादिनकथयति। परं तमलयानिले प्रसरति सति विरायचिरकालं। शून्यं ज्ञानरहितं अंतः अंतःकरणं वहति। विरहिदाहकत्वाद्दक्षिण वायोर्विषं नवेनेतिभावः। पुष्पिताग्रा छंदः। ७६॥ सध्याकलहांतरिता यथा॥ विरमतीति। इति इत्थं चिंतयेतिभावः। अधोमुखी अधोनीचैर्मुखं यस्याः सानायिका कलहं पत्यासहेति शेषः। सखीभ्यः लपितं अनालपितं समाचकांक्ष। धार्ष्ट्यधार्ष्ट्याभ्यां कथयितुमकथयितुं चैच्छदित्यर्थः। इतीतिकिं। चेतः कथनं विनानविरमतिनशाम्यतीत्यर्थः। निवेद्य दुःखं ह्रिनोभवंतीति पुनः कथनेसति कापिलज्जासमुपैति। अ धार्ष्ट्याद्वक्तुं नशक्यत इत्यर्थः। संशयालंकारः। पुष्पिताग्राछंदः। ७७॥ प्रौढाकलहांतरितायथा॥ अकरोदिति॥ कापिसखीनायिकांप्रतिवदति। हे अरसज्ञेक्रीडारसानभिज्ञे। यद्वा। क्रुद्धारसज्ञ इत्येकपदं। कोप

३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसज्ञ इत्यर्थः। यद्वा। रसज्ञेनायकेऽद्धा कोपेनेति सर्वत्रयोऽयं नेत्रशोणिमानं नेत्रयोः रक्तत्वं
किमु अकरोः। तथा कृतवतीत्यर्थः। वा पुनः। करपद्मेन तर्जनं भर्त्सनं बहिर्निष्काशनरूपं।
किं अकार्षीः। किं कृतवती। अतिकोमलेन कठिनाचरितमिति कोपवैचित्र्यमुक्तं। किंच। कल
हं किं अधाः। कृतवती। यद्वा। नायिकानेत्रपद्मरसज्ञेंद्रियाएषा मंत्र्यवदति रसज्ञा जिह्वा।
शेषं पूर्ववत्। युक्तमेतत्। हितमिति। दैवेन दष्टाः हताः हितं अर्थं न विदंति न जानाति। श्री
पच्छंदसिकं छंदः। ७८॥ परकीयाकलहांतरितायथेति नांदर्शयति॥ भर्तुरिति। सखीं वद
ति। हतधिया मया क्रोधात् स अवधीरितो धिक्कृतः। भो मातः विधिर्दैवं बलीयान्। तस्यैवे
दं दुर्विलसितं। न मे पराध इत्यर्थः। सकः। यस्य भर्तुः शृंगारादिरसर्वपोकस्य कृते इत्यर्थः।
यन्निमित्तमित्यर्थः। गुरुश्वशुरादिः लघुरभूत्। समागणनीयो जात इत्यर्थः। पुनः। गो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
३१

ष्ठीजनसमूहः। कनिष्ठीकृता। अदृश्याभूदित्यर्थः॥ पुनः॥ धैर्यधीरत्वं विवेकित्वमित्यर्थः॥ त
द् वकोशधनं भांडारगतद्रव्यं गतं। किमपि ना वशिष्टमित्यर्थः॥ पुनः। सहचरी समीपवर्ति
नी सखी तस्या नीतिर्दूरतः कृता पुनः त्रपा लज्जा त्वरणावत्वरणेन तत्क्षणं निर्मुक्ता अतिशये
न त्यक्तेत्यर्थः॥ पुनः। स्रोतस्वती स्रोतः प्रवाहोऽस्या अस्तीति। गंभीरत्वेन नदीत्यर्थः॥ विंड
वत्प्रतिचिता। संकेतवर्त्मन्यागच्छंत्या मया विंडुनाऽत्यल्पमभ्यस्तेत्यर्थः॥ अत्र नमस्कोया
लंकारः। समज्या परिषद्गोष्ठी। स्रोतस्वती द्वीपवती निम्नगापगेत्यमरः। शार्दूलविक्री
डितं वृत्तं ।७८॥ सामान्याकलहांतरिता यथेतदाहरति॥ यत्पंकेरुहेति॥ हे सखि। यो नाय
कः तत्सर्वं यथार्थं सत्यार्थं अकरोत्। तस्मिन् नूतनादृशे प्रकोपः अतिशयितकोपः कृतः॥ मां
धिक् अहं निंद्येत्यर्थः॥ मम जीवनं प्राणधारणं धिक् निंद्यं। अतः कामं धिक् येनैवंअ

स्रवंती
३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र त्वं न स्पृष्टमिति भावः। चेष्टितं कन्याक्षादि धिक् वयो यौवनं धिक्। तदिति किं। यत्र समेति
सर्वत्र संबंधः। पाणिकमलं पंकेरुहलक्ष्म पंकेरुहस्य कमलस्य चिह्नं यस्मिन् तत्। यत्
भाग्यालये जन्मकुंडलिकायां गुरुर्बृहस्पतिः। वा उनः वेधसा ब्रह्मणा ललाटफलके य
त्भाग्याक्षरं न्यस्तं लिखितं। सर्वेषां भाग्यसूचिता इत्यागमत्वं ध्वनितं। शार्दूलविक्रीडि
तं वृत्तं॥ ८०॥ विप्रलब्धां दर्शयति॥ संकेतनिकेतनेत्यादि॥ स्पष्टं। अस्या विप्रलब्धाया अवस्था
निर्वेदादय इति। तत्र निर्वेदः स्वावमाननं सखीजनेउपालंभः। चिंता तदपराधस्मृतिः। मू
र्छा इंद्रियवैकल्यं शेषं स्पष्टं। ८१॥ मुग्धा विप्रलब्धा यथेत्युदाहरति। आलीभिरिति॥ आ
लीभिः सखीभिः। अनेककपटैः। अनेकैः कपटव्याजाय्येषु तैः शपथैः कुंजोदरं संकेती
कृतं कुंजमध्यं नीतया। प्रापितया विप्रलब्धया नायिकया। तत्र कुंजोदरं शून्यं प्रियर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
२२

हितं निरीक्ष्य विस्तुमितया न प्रस्थितं न चलितं। न स्थितं प्रियागमनागमनाभ्यां व्याकुलितमित्यर्थः। किंच। नवोढनीरजदृशा। नवोढा चासौ नीरजदृक् च तया। कंजोपकंठे कुंजसमीपे दृष्टयोन्मत्ताः। पतितः क्षिप्ता दृगित्यर्थः। किंभूताः। दृषा केन चिन्मनोरथेन तामप्यंतो व्याकुलाये भृंगास्तेषां कदंबं समूहस्तस्य डंबरप्राप्तम् एतद्रूपारभटीतस्य चमत्काराः चित्रविलासास्तानपि स्पृशंतीति तत्तुल्या इत्यर्थः। निदर्शनालंकारः। शार्दूलवृत्तम्॥ ७२॥ मध्याविप्रलब्धायामेसुदाहरति। संकेतकेलिगृहमिति॥ एणीदृक्स्त्रीमृगनेत्राः। वचनं अर्धाक्षरमेव अर्धानि अक्षराणि यस्मिन् तत्। नेत्रं अर्धविकाशमेव अर्धविकासो यस्य तत्। तांबूलं अर्धकवलीकृतमेव तस्यादिति सर्वत्र क्रियासंबंधः। न ददर्श न वेकल्पाज्जडीभूतेस्थितवतीत्यर्थः। किंभूतायाः। संकेतकेलिगृहं एत्यप्रियसंगमेच्छयाप्राप्य। तच्च शून्यं कांतरहितं निरीक्ष्य निधृत निश्वसि

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताधरायाः। निभृतमंदं निश्वसितं यस्मिन् तथाभूतो धरो यस्यास्तस्याः। अत्र अर्धविकासिनेत्र
निमीलिता ईषन्मुकुला दृष्टिः। तस्या आनंदे विधानात्। अतः शून्या दृष्टिरियं। यथा। समंता
त्पुटो दृश्यदृष्टशून्यविलोकनी। निःकंपा धूसरा शून्याचिंताया दृष्टिरिष्यत इति। वसंतति
लकं छंदः। ५२॥ प्रौढाविमलच्छायये तदाहरति। शून्यमिति॥ तया शून्यं कांतरहितं उजाग
रं निरीक्ष्य चेतोभवं कामं कुटिलं क्रूरं प्रियविरहजं पीडाजनकत्वात् कुसपिनति वेदिता। कां
तानयनार्थं ज्ञापितेत्यर्थः। वा उत सहचरी सख्यपि नो दृष्टा प्रियदृष्टांतमित्यर्थः। परं कपंक
ज दृशा तया इति एवं भर्गस्य भर्जितेः शिनाम्न इति भर्गस्तस्य स्मरहरस्येत्यर्थः। स्तुतिश्च
के क्रियते स्म। इति किं। शंभो। शंकर। शं कल्याणं भवत्यस्मादिति शं करोतीति पदद्वयं। सं
तमानां रवकाविलेन। चंद्रशेखर चंद्रस्तव शेखरे तिष्ठतीति काममित्र लाजराभिर्बद्धो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरहिणां दुःखजनको माभवत्विति तेनातोल्पमपि भयमिति भावः॥ इतिसर्वेषां दुःखमिति हर श्री
शोभाकंठे यस्य विषभक्षणात्। गौरांगस्य नीलकंठत्वं शोभैव। अतो मद्दुःखविषहरणं कि
यदिति भावः॥ शूलिन्निति त्रिशूलेन निःशेषं हंतव्याः स्मरत्वात्तस्य ततः पूर्ववद्दाहो नयुज्यत
इति भावः॥ शिवेति। आनंदरूपोसित्वं। यद्वा शिवा गौरी विद्यते ऽर्द्धांगत्वेन यस्य सः। अर्शआदि
त्वादच् प्रत्ययः॥ तथा प्रियमिलनान्मामप्यानंदरूपां कुरुष्वेति भावः॥ शार्दूलविक्रीडितं वृ
त्तम्॥ ८४॥ परकीयाविप्रलब्धा यथेत्युदाहरति। दत्वेति॥ तस्मात्तत्वं यथा प्रियो न दृष्टः। सं
केतित इति भावः॥ किं कृत्वा। धैर्य्यमेव भुजंगः सर्पस्तस्य मूर्द्ध्नि शिरसि चरणौ दत्वा। यद्वा॥
धैर्य्यं च भुजंगश्च तौ। तयोर्मूर्द्ध्नि। पुनः॥ लज्जारूपां नदीं उल्लंघ्य। पुनः॥ घनांधकारस्य

पटलं। घनं निविडं अंधकारं तस्य पटलं समूहं अंगीकृत्य तयेति शेषः। च पुनः। संतापे

ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न आकुलयानया पोथो धरे जलधरे गर्जति सति। क्रोधेन आक्रांतो व्याप्तोयः कृतांत
स्समहिषस्तस्य भ्रांत्या। कालमहिषो यमिति भ्रमेण। पथिकः सर्वतो दृष्टो यो जितेप्र
रिते। मेघस्य विरहि वैरिता नदवलोकने नैवं सुप्त इति भावः। अत्र भ्रांतिमानलंका
रः। शार्दूलविक्रीडितं वृत्तं। ८९॥ सामान्या विप्रलब्धा यथेत्युदाहरति। कपटेति॥ स
कलरसिकगोष्ठीनां वंचिका असौ वारयोषा वेश्या केन चित्कपटवचनवक्ता। कु
पटवसनानि वक्रीतिसतेन वंचिता। कृत्रिमालंकारदानेनेति भावः। इति हेतोः दिग
तोयेभ्यंमास्ते एव विक्षिते चक्षुषी येन सकेलिकंजः। विकचानि फुल्लानि यानि कुसु
मानि तेषां कांति छद्मना विहसती वेति शेषः। उत्प्रेक्षालं[illegible]कारः मालिनी छंदः। ९०॥
अथोक्तां दर्शयति। संकेतस्थलमिति। उक्ता। उत्कंठिता। स्पष्टमन्यत् अवधीति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी॰
३४

अवधिदिवसे अनागतप्रेयसि सनीलार्थः। प्रोषितनयनिकायां अनिमानिर्नं। निषेधहेतुमाह। तस्मादिति। प्रोषितयनिकायाः। भर्तुः अवधिदिवसे अमुष्मिन्दिने अहमायास्यामीत्य वधीकृतदिने। भवनागमननियमइति। संकेतपदेन तद्व्यावर्तनात्। भवने गमननियमस्य व्यावर्तनात्। अस्पाउकायाः। अरतिर्विषयद्वेषः। अंगाकृष्टिः। अंगमोडनं। कपटं लज्जादिना क्रियाविषयकव्याजः स्पष्टमन्यत्। ८॥ मुग्धोकायथेष्टुदाहरति। यन्नाद्यापीति। प्रियः अद्यापि न समागत इति यावत्। अतः प्रायेण बाउलेन परां अन्यां स्त्रियं प्रपेदे प्राप्तवान्। इत्थं चेतसि चिंतयन्नपि। व्रीडया लज्जया सखीनप्रच्छति। किंच दीर्घश्वसितं न दधाति। चकितं सकंपं न प्रेक्षते। उभयत्र सखीभीते नर्थः। केवलं किंचित् मनाक् पक्कोयः पलांडुःकंदविशेषः तद्दल पांडुरा रुचिः

३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कांतिर्यस्याः तां कपोलस्थलीं धत्ते विरहसंतापेन बिभर्तीत्यर्थः ॥ शार्दूलविक्रीडितंवृत्त
म् ॥ ८८ ॥ मध्योक्तायथेत्युदाहरति । आनेतुमिति ॥ कापि नवोढा नीरजमुखी । नवंवृ
ढं यत् नीरजं कमलं तद्वन्मुखं यस्याः सा । यथाश्रुत मार्गानेम ध्यायां नवोढात्वप
पत्तिः । इत्थं चिंतयंतीति शेषः । अक्ष्णोर्विषये कर्णेय त्वद्वर्णे केतकं तस्य रजसः परा
गस्य पातेन यः उपघातः पीडा तस्य छलात् । बाष्पोदकं मुंचति । इत्थं कथं प्रियस
खीमत्प्रेषितेत्यर्थः । आनेतुं न गता किमु । अथवा । भुजंगात् भीतः किमु । मार्गवर्ति
नः सर्पात् भीतः किं नागत इत्यर्थः । असौ प्रियः प्रतिषेधवाचि प्रतिषेधार्थवाक्यस्या
लस्यानिषेधं उक्तवत्यामपीत्यर्थः । क्रुद्धो वा वर्तते । अन्यथा आगमिष्यदित्यर्थः ॥ शा
र्दूलविक्रीडितं वृत्तम् ॥ ८९ ॥ प्रौढोक्ता यथेत्युदाहरति ॥ श्रांतनिकुंजेति ॥ भ्रांतिकुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्टी
२९

जभ्रातः हे यूथि सखि। हे रसाल आम्रबंधो। मोतम स्खिनि रात्रमातः। हे तिमिरपितः। प्रसी
देति प्रत्येकं संबंधः। अस्मिन् वने भवंत एव मम भ्रातरादय इत्यर्थः। इति हेतोः किंचित्
पृच्छामि। कथय। नीरधराभिरामः सजलजलदकांतिः दामोदरः कृष्णः किं न समाज
गाम नागतवान्। कथयंतु इति वाक्यशेषः दामोदर इति पदं भक्ताधीनत्वं सूचयति। ते
न कृपा चिह्नकाया। भक्तपावणी हन्त स्निह्यती तिभावः। वसंततिलकं छंदः। ६०॥ परकीयो
क्तायथेति तामुदाहरति। स्नातमिति॥ काचित् सखीं वदति। हे सखि। किं तपो न तप्तं॥
तथापि अद्यापि इयता कालेन स नायको नेत्रातिथिः। नेत्रगोचर इत्यर्थः। कथं न त
प्तपयेति शेषः। तपो दर्शयति। वारिदवारिभिर्मेघजलैः स्नातं। पुनः। घनेकाननेवा
सो विरचितः। पुनः। मनसिजः कामदेवः श्रीनैषधदनविंडभिः आराधितः। एतेन

२९

69

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्योत्स्नायां रजन्यां कोपि मां मा प्रैक्षिष्टा इति चंदनलेपो धृयते। पुनः। रजनीजागरव्र
तेन नीता प्राप्ता। पुनः व्रीडा लज्जा। दक्षिणादानं कृतास्मके त्यर्थः। तस्यागमनफ
लप्रतीक्षयेति भावः। शार्दूलविक्रीडितं वृत्तं। ९१॥ सामान्यवनितोक्तायथे त्युदाह
रति। कथमिति॥ कापि वारांगना वेश्या धनाभिलाषात्। निःपतदश्रुजलेन अक्षा
लयत्। अंगादीत्यर्थः किंभूता वेश्या। कांतः कथं कुंजं संकेतस्थानं न समुपैति। इत्य
प्रकारेण चिरं चिरकालं चेतसि चिंतयंती विचारयंती। अत्रोपजातिर्वृत्तम्। इंद्रव
ज्रोपेंद्रवज्रालक्षणं मिश्रितपादत्वात्। ९२॥ अथ वासकसज्जां दर्शयति। अद्य मे
प्रियवासक इत्यादि स्पष्टं। वारः सूर्यादिदिवस इति विश्वः। अस्याश्चेष्टा सा किं क्रिया
वतीत्यर्थः। मनोरथेत्यादि। मनोरथश्चेतसि बहुधा विकल्पना। स्पष्टमन्यत्। ९३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
३९

मुग्धावासकसज्जा यथेत्तितामुदाहरति। हारमिति॥ नवोढ इत्युक्तीनववधूस्तव्ग्धेत्यर्थः। स
मुत्ता मुदास्तहृदवर्तमाना। द्वारान्तवीक्ष्यते पश्यति। कांतागमनमितिभावः। किंभूता। वासकस्य
निश्चितप्रियागमनरूपवासस्यरजनौ रात्रौ आलीनां आसमंतात् लीनां निगूढां लज्जये
तिभावः। इतिवक्ष्यमाणप्रकारेण कामानुरूपां क्रियां कुर्वती सतीतिशेषः सा चिस्मेरस्य
ली सा चितिर्यक् स्मृत्वेत्यर्थः। सख्योमांनपश्येयुरितिधियेतिभावः। स्मेरं सहासं स्वस्वयस्याः
सा। इत्नीतिकिं। तारकांतिरुचिरं। तारा एणां शुद्धमौक्तिकानां याकांतिः शोभा तयारुचिरं
रमणीयं। हारं मुक्तावलींगुंफतिरचयति गुंफसंदर्भे। पुनः। कांचीलतां ग्रथ्नाति। पुनः
दीपं न्यस्यतिसज्जयति। किंतु तत्र प्रदीपे पुनर्बहलं स्नेहं न धत्ते। न निक्षिपति तदालोकए
व। प्रियोरतिकेलिं विधास्यतीति लज्जयेतिभावः। तारेषु काद्रिषु शुद्धौ मौक्तिक इति। हा

३९

71

न्त तस्मिन् हे विधंइत्यर्थः। पुनरपि विरहेण कांतवियोगेन विह्वलो दुःखं भविष्यतीति शेषः।
पुनः। अद्वैते आवयोः अंगे कल्पे। स्फीतं सम्यक्छ्रितं। अन्योन्यवीक्षणं च न स्यात् संदेहा
लंकारः।९०। परकीयावासकसज्जा यथेति नाम्रुदाहरति। श्वश्रूरिति॥ काचिन्नायिका
छलेन केनचिद्व्याजेन श्वश्रूं स्वापयति निद्रापयति। च पुनः प्रदीपांकुरान् प्रकृष्टदीप
शिखाः तिरोधत्ते। स्वपटादिना छादयतीत्यर्थः। पुनः। सौधकपोतानां ये पोतावालकास्ते
षां निनदैः शब्दैः सांकेतिकं चेष्टितं संकेतसंबंधि व्यापारं धत्ते करोति। पुनः शश्वत् वारं
वारं पार्श्वयोः शय्योभयप्रांते विवर्तिता अंगलतिका यस्याः क्रियायां तद्यथा स्यात्तथा।
लोलंती प्रियागमनमुदा स्फुरंती कपोलस्फूर्तिर्यस्य क्रियायां तद्यथा स्यात्तथा। तस्यां तिके
क्वापि क्वापि प्रदेशे प्रियधिया जारागमनसंभावनया कर्णं न्यस्यति प्रेरयति। अत्रापह्नु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र. टी.
१०

निरलंकारः। शार्दूलविक्रीडितंवृत्तम्।९८॥ सामान्यवनितावासकसज्जायर्थेति दर्शयति।
चोलमिति। वारांगनावेश्या। वारेषुरतिदिनेषु। यदित्थमयं यत्ययं मनो रथं न वितनुते त
त्किंनकिमपीत्यर्थः। किंभूता। इत्थंवक्ष्यमाणप्रकारेण चंदनेन चर्चितैर्मृगमदैः क
स्तूरीभिः अंगानिकरचरणललनादीनि संस्कुर्वती। अधिवासयंती। इत्यंकथंनीलनिचोल
स्यउपरितनप्रच्छदपटस्यकर्षणविधौ। चोलं कूर्पासकंयाचिष्येप्रार्थयिष्यामि। पुनःचुं
बने। चूडामणिंकेशपाशरत्नंयाचिष्ये। पुनःकुचयोः करार्पणविधौकांचनींसौवर्णींकांचीं

या.

क्षुद्रघंटिकांयाचिष्येइति। निचोलः प्रच्छदपटः। चोलः कूर्पासकोस्त्रियामित्यमरः। शार्दू
लविक्रीडितंवृत्तम्।९९॥ अथस्वाधीनपतिकांदर्शयन्नाह। सदा कृताज्ञाकरोति॥ सदास
र्वदा आकूतेनअभिप्रायेण आज्ञांकरोतीति एवंभूतःप्रियतमोयस्याः सा सास्वाधीनपतिका।

१९

73

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्याश्चेष्टा। वनविहारेत्यादयः। मदो हर्षः। अहंकारः स्वस्मिन्नाधिकत्वबुद्धिः। शेषं स्पष्टं।
१०॥ मुग्धा स्वाधीनपतिका यथे तदाहरति। मध्य इति॥ काचित्सखीं वदति। हे सखि मध्ये
कटिप्रदेशे कृशिमा कृशत्वं। नयने गरिमा गुरुत्वं। वा पुनः देहे कांतिमा लावण्यं पुनः। श्रो
णौ नितंबे प्रथिमा पृथुत्वं। गतौ गमने जडिमा जडत्वं मंदगतित्वं नेपथ्यः। नवा नेत्रे व
क्रिमा वक्रत्वं। लास्ये नृत्यगीतवाद्यात्मके दृढिमा दृढत्वं। वाचि वाग्विषये पटिमा पटु
त्वं नवा। हास्ये हासरसे स्फीतिमा प्रागल्भ्यं। सर्वत्र मुग्धत्वं हेतुरिति भावः। यद्यप्येवं त
थापि प्राणेशस्य मनः मय्येव मज्जति लीनं भवति। तत्र किं कारणं न जाने इति शेषः।
कांतिमा वक्रिमा स्फीतिमेत्यत्र इमनिच् प्रत्ययश्चिंत्यः। शार्दूलविक्रीडितं वृत्तं। ११। मध्या स्वा
धीनपतिका यथे तदाहरति। यदपीति। हे प्रियसखि। प्रिया चासौ सखी च तस्याः संबोध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०टी
३९

नं। रतिमहोत्सवे संभोगक्रीडायां यदपि यद्यपि नकारो निषेधः। चपुनः। करेण यदपि नी
विधारणानि वस्त्रग्रंथिवसनानि। तदपि। तथापि एषः पतिः प्रियः पार्श्वदेशं चेत् यदि न
मुंचति। तत्किं आचरामि। अतः परं किं कर्तव्यः। तत्त्वं शिक्षय इति शेषः। पुष्पिताग्रा छंदः।
२०॥ प्रौढा स्वाधीनपतिका यथा येन सदा हरति। वक्त्रस्येति॥ काचन सखी वदति। हे सखि। कां
तः प्रियः कस्याश्चिन्नायिकायाः धन्यानां। अरविंदसुंदरदृशां इतरासां नायिकानां कांति
स्फूर्तिकरणात् धन्यत्वं अरविंददृक्त्वं च कथितं। वक्त्रस्य मुखस्य। अधरपल्लवस्य वच
सो वचनस्य। हास्यस्य हास्यरसस्य। लास्यस्य नृत्यस्य स्फूर्तिं करोतीति वक्त्रादौ सर्वत्र संबंधः।
किंतु मे दयितस्य वल्लभस्य स्वप्नेनापि जाग्रदनुभवसंस्कारजः स्वप्नस्तेनापि कापि अन्या ना
यिका श्रुतिपथं कर्णमार्गं। चेतःपथं मनोविषयं। दृक्पथं दृग्विषयं न गच्छति न प्राप्नो

३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति। प्रत्यक्षतः किमुतस्याश्चित्यर्थः। तस्यता दृशस्य भेदग्रहः कथं अस्कतेन सहकेनापिनि
र्मितेन भिन्नत्वं माभवत्वित्यर्थः। शार्दूलविक्रीडितं वृत्तम्। ३॥ परकीयास्वाधीनपतिकाय
थेत्युदाहरति। स्वीयाइति॥ काचन सखीं वदति। हेसखिस्वीयाः आत्मीयाः सरोरुहदृशः।
गृहे संति भवंति। यासांस्वीयानां विलासेन कराभिनयादिना कणतां काचीकुंडलहेमकं
कणानां स्वणत्कारोन विश्राम्यति। तत्र कुंडलं कर्णभूषणं हेमकंकणं सुवर्णप्रधानम्।
तत्र को हेतुः किंकारणं। कानने वने पुरपथे। पुरस्य पंथाः पुरपथस्तस्मिन्। सौधेसुधया
चूर्णेन निर्मितः सौधस्तस्मिन् धवलगृहे सखीनां सन्निधौ मम वल्लभस्य दृष्टिः मां पवि
तः सर्वतो भ्राम्यंती न संचरति। मां न त्यजति तन्नजानामीत्यर्थः। अत्रस्वीयाभ्यः स्वाधिकाक
थनेन व्यतिरेकालंकारः। शार्दूलविक्रीडितं वृत्तम्॥ ४॥ सामान्यवनितास्वाधीनपतिका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰ ४॰

यथेत्युदाहरति। संत्येवेति॥ काचित्सखीं वदति। मृगदृशः प्रतिमंदिरं। मंदिरे मंदिरे इतिवीप्सायामव्ययीभावः। संत्येव यासां मृगदृशां सुधासागरोद्भूतसमुद्रस्य स्रोतः स्वस्फूतं लसंयत्सरोजं कमलं तद्वन्मुखं दृशः। चमत्कारो येषां ते एवं विधादृश्यो विभ्रमाविलासाः। किंतुचित्रं। आश्चर्यं। युवा तरुणः प्रियः विचित्रमन्मथकलानां वैशद्यहेतोः उत्कर्षकारणात्। पुनर्वारंवारं मय्येव चित्तहरं मनोहरं वित्तं प्रयच्छति ददाति। किं कारणं तन्न जानामीत्यर्थः। शार्दूलविक्रीडितं वृत्तं।५॥ अथाभिसारिकां दर्शयति। स्वयमिति। अभिसारयति इत्यादिना प्रियमानयतीत्यर्थः। उक्तंच। कामार्ताभिसरेत्कांतं सारयेद्वाभिसारिकेति। स्पष्टमन्यत्। अस्या अभिसारिकायाः समयात्तु रूपेत्यादि स्पष्टं। स्वीयापरकीययोरपि सारचेष्टिते समत्वमाह। हरतीति। इति उक्तप्रकारेण परकीयायाः स्वकीयाया स्वक्रमोभिसारव्यापारः प्रकृतए

४०

77

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वञ्चद्दिष्टएव। ६॥ नत्वमुग्धाभिसारिका यथेति दर्शयति। दूतीति। काचित्सखी वदति। हे मु
ग्धे अयं दयिताभिसारसमयः। दयितेऽभिसरणयोग्यः समयो जातः प्राप्तः। त्रपां लज्जां मु
च। समयमाह। विद्युद्दूती उपागता समीपं प्राप्ता। पुनः। सहस्थायिनी सहेति तथाभूता ५
सहचरी सखी रात्रिः। दैवज्ञो दैवं भाग्यं जानातीति तथाभूतो जलदो मेघः स्वनेन शब्देन शुभां
प्रस्थानवेलां दिशतीति कथयति। पुनः। तिमिरस्तोमोऽपि अंधकारसमूहोऽपि झिल्लीरवैः शृं
गारीधुनिभिः मांगलिकीं मंगलनिमित्तां वाचं तनोतीति विस्तारयति। यथा कस्यचिज्जिगी
षोर्यात्रासमये मंगलं विस्तार्यते इत्यर्थः। शार्दूलविक्रीडितं वृत्तं। ७॥ मध्याभिसारिका य
थेति तामुदाहरति। भीतासीति। कश्चिन्नायिकां वदति। हे कांते पथि मार्गे भुजगात्सर्पात्
नैव भीतासि। पुनः। तद्भुजस्य संगे संबंधे किमपि ईषदपि कंपं उरीकरोषीति। अंगीकरोषि। सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृ॰टी॰
४१

त्तिकभावोदयादितिभावः। उदर्यूरी चोरसीचेत्यमरपाठात् उरीति कृत्वश्चित्यः। तथा अंभोधर
ध्वनिभिः अक्षुभितासि। पुनः। मद्वाचिमच्चाटुवचनइत्यर्थः। साचिवदना असिवक्रीकृतवद
नाभवसि। किं आचरामि। किमत्रमनस्यनुसंधानत्वमित्यर्थः। वसंततिलकंछंदः। ८॥ प्रौढा
भिसारिका यथेतिदर्शयति। स्फुरदुरसिजेति॥ अथात्रप्रश्नः। कथय। यदिमनोरथोऽभि
लाषोरथोनस्यात् नभवेत्। संप्रश्नेभिङ्। तर्हि स्फुरदुरसिजभारभंगुरांगी॥ स्फुरंतौयौ
उरसिजौ स्तनौ तयोर्भारेणभंगुरंनम्रंअंगंयस्याः साभवती। किशलयवत्कोमलाकांति
र्यस्यतेन पदेन चरणेन निशास्वरात्रिषु कथंकेनप्रकारेण गंतुंसहेत। गमनसहाभवेदि
त्यर्थः। प्रस्तकार्यैषयोअथेत्समरः। पुष्पिताग्राछंदः। ९॥ परकीयाभिसारिका यथेत्युदाहर
ति। रभसादिति। हेसखिरभसात्कांतमिलनौत्कंठ्यात् अभिसर्तुंकांतंप्रत्यभिगंतुंउद्य

४१

79

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानां क्रमोद्यमानां वनितानां अत्यनुरागवतीनां योषितां वा दिदोमे घ्नः विवस्वान् सूर्यः। रज
नीरात्रिर्दिवसः। अंधकारं अर्चिः प्रकाशकं तेजः विपिनं वनं वेश्मगृहं। विमार्गः अपंथाः स
एवमार्गः। वनिता जनितात्यर्थानुरागायां च योषितीत्यमरः। औपछंदसिकं छंदः॥ ९॥ तमिस्त्रा
भिसारिका। ज्योत्स्नाभिसारिका यथा तामुदाहरति। चंद्रोदय इति। चंद्रोदये अंगकेषु प्रियवि
रहतनुत्वेन अनुकंप्यानि अंगानि अंगकानि तेषु। अनुकंपायां कन्। चंदनं विन्यस्य आलिप्य
चंद्रकिरणसमानत्वेन कोपि मां न ज्ञास्यतीति धियेति भावः। विहस्य। कांतसंगमे नात्मा
नं ग्रहरवयिष्यामीत्युत्कंठेनेति भावः। विनिर्गता या कांतं प्रत्यभिसृता या नायिकायाः मदनो
पि मदयति हर्षयत्येवंभूतोपि मनो निहंतुं पीडयितुं करेण कौंदान् कुंदस्यावयवाः पुष्पाणि
कौंदास्तान् बाणान् विभरां बभूव दधार। अच्चोपजातिर्वृत्तम्। १०। दिवाभिसारिकायथे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
५२

त्सुदा हरति। पल्लीनामिति। समजनाः गृहजनाः मिथः परस्परं कृतमहोत्साहं। कृतो महोत्साहो यस्मात् क्रियायां न घर्षा स्यात्तथा। पुरः अग्रे प्रस्थिताः आमंत्रणकगृहं चलिताः सन्ति। पल्लीनां अल्पग्रामाणां अधिपस्य स्वामिनः पंकजदृशां स्त्रीणां पर्वोत्सवामंत्रणे। पर्वणि चैत्रपौर्णमास्यादौ य उत्सवस्तदर्थमामंत्रणं तस्मिन् जाते सति। अत्रांतरे। सव्याजं। किंचिदपदिश्य स्थितयोः पुनर्विहस्य। मनोरथावाप्त्यानंदेनेति भावः। शुद्धांतं अंतःपुरं गतयोः प्राप्तयोर्यूनोः युवतीच युवा च तयोः पुनः खिन्नकपोलयोः खिन्नौ खेदयुक्तौ कपोलौ ययोस्तयोः परस्परांगसंगमेन सात्विकभावोदयादिति भावः। कोप्येष लक्षितुमशक्यः कंठस्य ग्रहो ग्रहणं आलिंगनमिति यावत्। विजयते विशेषेण जयति विरमतीत्यर्थः। अत्र चांतःपुरं प्रत्यभिसरणेनाभिसारिकेयं शुद्धांतश्चावरोधश्चेत्यमरः। पल्ली क

५२

टीग्रामकयोरिति। ९२॥ सामान्याभिसारिकायथेत्युदाहरति। लोलन्द्योलेति॥ वारांगना
वेश्या कस्यापिकृतिनो धन्यस्य क्रीडाकुंजगृहं प्रयाति अभिसरति। कथंप्रयातीत्यत आ
ह। लोलंतीचंचलास्यप्रच्छदपट्टस्य चमत्कृतिश्चमत्कारोयस्यांक्रियायांतद्यथास्यात्तथा।
पुनः। प्रविलसंतीकांचीलतायाः संकृतिर्यत्रक्रियायांतत्। पुनःस्तंबत्तुगाढोयःकंचु
कस्यबंधस्तेनबंधुरमप्राचलंती। मंडलिताववक्षोजकुंभस्यउन्नतिर्यत्रक्रियायांतत्। पु
नःस्फूर्जंतीविलसंतीदीधितिःकांतिविशेषोयत्रतत्। पुनःविस्फुरंतीयागतिस्तयाच
लंतीचपलाचामीकरालंकृतिःसुवर्णालंकारोयत्रक्रियायांतत्। सर्वाण्यपिक्रियाविशे
षणानि। वधूरबंधुरौरम्येनस्त्रेचेतिविश्वः। शार्दूलछंदं। ९३॥ संप्रतिपरिशेषयति। सु
ग्धायाइत्यादिशेषंस्पष्टं। तत्राप्याकाशंप्रगल्भ्य। ९४॥ एवंप्राचीनपद्धतिंप्रदर्श्येदानीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
४२

नवीनमतमभिधातुं तत्पद्योपन्यासपूर्वकमाह ॥ प्रस्थानमिति ॥ काचिदग्रिमक्षणकरिष्यमाणगमनकांतवियोगविह्वलनायिका जीवितं प्रति वदति । हे जीवित । प्रियतमेया त्वं दे शांतरंगं त्वं निश्चितचेतसि । निश्चितं चेतो यस्य तस्मिन् प्रियतमे सति सर्वे समं समकालमेव प्रस्थिताः चलिताः ते के तत्राह । प्रियसखेः प्रियाश्च ते सखायश्च समीपवर्तित्वात् । तैर्वलयैः कंकणैः प्रस्थानं कृतं । तत्क्षणमेव क्षीणत्वप्राप्त्या धोनिर्गतमित्यर्थः । पुनः अस्त्रैः रक्तैः अस्त्रुभिर्वा अजस्त्रं निरंतरं गतं विगतं । विरहशोषित्वादिति भावः । यद्वा अस्त्रैः अस्त्रुभिः अजस्त्रं संततं गतं चलितं । पुनः धृत्या धैर्येण क्षणमपि नासितं । पुनः चित्तेन पुरः तदग्रत एव गंतुं व्यवसितं व्यवसाय उद्यमः कृत इत्यर्थः । विवक्षितमाह । गंतव्ये सति । प्रियं विनास्थातुमशक्यत्वादित्यर्थः । प्रियसुहृदां सार्थः संघातः । किमुवितर्के उत्सृज्यते परित्यज्यते ॥

४२

(८३)

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

सार्थोन त्वत्तान्नविलंबो बलं वनीय इत्यर्थः। सार्थः संघातमात्रक इति विश्वः। शार्दूलविक्री
डितं वृत्तं ।१९॥ इत्यादीति। अधिमक्षणे अग्रभाविनीत्यर्थः। प्रोष्यत्पतिकेति लेखकपरं
परयाडुष्टोयं पाठः। लटि वसतेरुष्यदित्यसिद्धेः। कविप्रयुक्तश्चेत्चिंत्यः। किं तु प्रवत्स्यत्प
तिकेति वक्तव्यं। नवनीनवानां स्मरणे तथा हीति। तदेव प्रदर्श्यत इत्यर्थः। अन्यच्छक्तमु
त्पश्यामइत्यंतं स्पष्टं। युक्तं समंजसं उत्पश्यामः। भेदकल्पनं युक्तमुत्प्रेक्षितमित्यर्थः।१९॥
लक्षणं त्विति। यस्मादित्यादि बाष्पादय इत्यंतं स्पष्टं। प्रोष्यत्पतिकेति सर्वत्रापपपाठः। किं
तु प्रवत्स्यत्पतिकेति सर्वत्र ज्ञेयं।७॥ तत्र मुग्धां प्रवत्स्यत्पतिकामुदाहरति। प्राणेश्वर इति।
क्षामोदरी कृशोदरी नायिका प्राणेश्वरे कांते निर्गमाय प्रयाणाय किमपि किंचिदपि ज
ल्पति एच्छति सति वदनं आनमयांचकार। लज्जयावक्तुमशक्यत्वादिति भावः। पुनः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
४५

आलीसखीनिभृतं मंदं लतानिकुंजं एत्य प्राप्य। उन्मत्तकोकिलकलध्वनि। आततानचकारेत्य
र्थः। मत्तकोकिलपंचमध्वनिमाकर्ण्य यं वसंतागमनं ज्ञात्वा विरहकातरत्तया न प्रयास्यतीति बु
द्धेत्यर्थः। वसंततिलकं छंदः। ८॥ मध्याप्रवत्स्यत्पतिकामुदाहरति। गंतुमिति। प्रिये गंतुं वदति
एच्छति सति। मृगदृशो नायिकायाः दीर्घनिःश्वसितं न आसीत्। नाभवत्। मृगदृशा इति पदं
कातरत्वेनेतिभावः। नवा नयनयोर्जलं आविरासीत् प्रकटी बभूव। विरहजनितदुःखेनेति
भावः। परं तु कचः केशः। जात्यावेकवचनं। किंतु वितर्के। आयुर्लिपिं आयुरक्षराणि परितं
भालस्थलीं ललाटप्रदेशं समुपाजगाम। आयुर्लिपेस्तत्र विद्यमानत्वादित्यर्थः। वस्तुतस्तु
अतिसंश्लिष्टापि केशपट्टिका विरहचिंतया ललाटपट्टमवतीर्णेति। अत्रोत्प्रेक्षालंकारः। व
संततिलकं छंदः। ९॥ प्रौढां प्रवत्स्यत्पतिकामुदाहरति। नायं मुंचतीति। यदुपते कस्य। तत्तु

४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सागे पि। अयं वियोगज्वरः सुभ्रुवां स्त्रीणां नष्टं चयति। ते न हेतुना विहितांजलिः कृतांजलिर
हं पृच्छामि। सत्यं यथार्थं वद। किं तदित्याह। तांबूलं कुसुमं पुष्पं पटीरं चंदनं। उदकं यत्बं
धुभिर्दीयते। मृतोद्देशेनेत्यर्थः। तत्सर्वं अत्रे वङ्गहृदयेत्यर्थः। परत्र स्वर्गे पि किमु विषज्वालाव
लीढुःसहं। अग्निज्वालावत् दुःखेन सह्यत इति किं तथैव दाहकं भवतीत्यर्थः। पटीरं खातिके
केतौ रंगे मूले च चंदन इति विश्वः। शार्दूलविक्रीडितं वृत्तम्॥ २०॥ परकीयां प्रवत्स्यत् पतिका
मुदाहरति। त्यक्त्वामिति॥ काचित्कांतं प्रतिवदति। पन्नग मूर्ध्नि पन्नगानां सर्पाणां मार्गप्राप्ता
नामित्यर्थः। मूर्ध्नि मस्तके पादयुगलं न्यस्तं। त्वद्दर्थे कालो पि न गणित इति तात्पर्यार्थः। किं
च। गुरोः श्वसुरादेः भक्तिः सेवा त्यक्ता त्वदर्थे इत्यर्थः। पुनः नीतिः कुलमर्यादा त्यक्ता। भवतो हे
तोर्मया किं न दुःकृतं अकारि कृतं। अपि तु सर्वमपीत्यर्थः। त्वयि प्रस्थिते सति युक्तं। एतद्दक्ष्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृं.टी.
४५

माणामित्यर्थः। तदेवाह। अंगानां शतयातनाः असंख्यातीव्रवेदनाः। यातनातीव्रवेदने त्यमरः।
पुनः नयनयोः कोपि रौरवः क्रमः रौरवनरकयातनाविसासदृत्यर्थः। यद्वा। रुरुश्चित्रलस्ट
गः। रुरोरयं रौरवः। क्रमः पातः। तद्वत्त्वदागमनं पश्यंत्या मे जीवितं यास्यतीत्यर्थः। चक्षुनः म
नसः। कुंभीपातकपरा भवः। कुंभीपातकनरकवत्पीडाचेत्यर्थः। यद्वा। कुंभ्यां कुलस्यां पाको
विक्लेदस्तद्वत्परा भवः। यथाग्निना कुंभ्यां पच्यते तथा विरहाग्निना तन्वाग्यां मन्नेत्रौ मनसो व्य
थाभविष्यतीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्। २१। वेश्या प्रवत्स्यत्पतिं कामुदा हरति। मुद्रामिति।
वारांगना वेश्या विगलन्नयनांबुधारा। विगलंती नयनांबुधारा यस्याः सा। इत्थं अनेन प्रकारे
णनिगद्य प्रियतमं करयोर्बभावदधे। इत्थं कथं। हे प्रियवलयाय वलयं कंकणं रक्षितुमि
त्यर्थः। मुद्रां अंगुलीयकं प्रदेहि। यत एतत् वलयं भवद्वियोगं आसाद्य प्राप्य सहसा आक

४५

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मिकं बहिर्यास्यति पतिष्यतीत्यर्थः। वसंततिलकं छंदः। २२७ अथोत्तमत्वादिभेदान्निरूपय
ति। अहितकारिण्यपि प्रीति। अस्या उत्तमायाः स्पष्टं। यथेति तामुदाहरति। पतिरिति॥ वाम
भ्रुवा। वामे सुंदरे भ्रुवौ यस्याः सा तया। कुचविचित्रितोरःस्थलः कुचाभ्यां विचित्रितं सपत्न्या
आलिंगनेनेति भावः। उरःस्थलं यस्य सः। एवंभूतः पतिः। शयनं शय्यां आगतः प्राप्तोयं
प्रसन्नानि यानि वचनानि तान्येवामृतानि तैः। अतर्पि प्रीणितः। पुनः सुभगा याः स्मितद्युत
यस्ता एव पटीरपंकद्रवाः चंदनकर्दमरसास्तैः अचर्चि चर्चितः। पुनः। विलसती विलोच
नेन योश्चमन्दतानि कांतिच्छटाविशेषास्तान्येवेंदीवराणि नीलकमलानि तैः अपूजि
पूजितः। निःकपटत्वाद्दैहिकद्रव्यैरेव संमानितः पतिरित्यस्या उत्तमत्वं। चमत्कारैर्भुजैर्
त्यस्तमीनः पाप्तोस संजसत्वात्। वामं सत्ये प्रतीपे चद्रविणे चातिसुंदरइति विश्वः। पृथ्वी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्री
४८

छंदः ॥४२॥ अथ मध्यमा। हिताहितकारिणीत्यादि। चेष्टां तं स्पष्टं। यथेति तामुदाहरति। कांत
इति। सागसि सापराधे कांते कंचुकस्पृशि। कंचुकं स्पृशतीति तस्मिन् सति। साचीकृतग्रीवया।
साचीकृता वक्रीकृता ग्रीवा यया तया नायिकया। कोपेन कषाया ईषद्रक्ता मन्मथशरवत्
क्रूराः कटाक्षांकुराः। तारकागतागतिविश्रांतिरूपावलोकनच्छटाः मुक्ताः प्रेरिताः। चतु
रः। साकूते साभिप्राये चाटुकादिविलसतीत्यर्थः। स्वभ्रुवा। शोभने भ्रुवौ यस्याः सा तया। का
चन अपूर्वा कल्पलता प्रीतिः मनोरथसंपादकत्वात् कल्पलतेत्युक्तं। महादानीकृता। प्रीते

३ दानस्य

रधिकत्वेन महत्ता। किंभूता प्रीतिः। दरईषत् हास एव केसरः किंजल्को यस्मिन्। एवं रूपं य
त्वचस्तदेव माध्वीकं मधु तस्य धारा प्रसृतिस्तया अलसा निर्भरा। कल्पलतापि मधुकेस ४९
रयुता भवति। दरहासक इति प्रियविशेषणे। दरो हासो यस्मिन्। रसो माधुर्य्यादितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं वच इति व्याख्याने प्रियहासस्यानुपयुज्यमानत्वादसमंजसं। शार्दूलविक्रीडितं वृत्तम्।२४॥
अथाधमा। दितकारिण्यपीति। चेष्टांतस्पष्टं। तत्र चंडी कोपन स्त्रीषु संमतेति। विश्वः। तद्यथे
तथमामुदाहरति। प्रस्थान इति॥ हे सखि। यो नायकः प्रस्थाने पुष्पत्रोटनादिनिमित्तगमने
तवमुखांभोरुहे मुखकमले। कमलेन छायां करोति। तन्मुखस्यातपबाधाभीत्येतिभावः।
पुनः। शिशिरया शीतलतया श्रीखंडद्रवस्य चंदनरसस्य धारया पुरोऽग्रे मार्गं सिंचति। तस्मि
न्प्रियसि अतिशय प्रियेऽभूयः पुनर्दृशाकुप्यसि क्रोधं प्रकटयसीत्यर्थः। किंभूतया दृशा। वि
द्रुमेति। विद्रुमाणां द्रवो निर्झरस्तस्य या नदी तस्यां रिंगन्त चलंतो ये तरंगास्तेषां भ्रमिर्भ्रमः आ
वर्त इति यावत्। तस्मिन्भ्रांतं अत एवक्लांतं यत्सरोजपत्रं तत्सदृशा समानया विद्रुमो
रत्नकोदंडे प्रवाले वालपल्लव इति विश्वः। सादावर्तोंऽभसां भ्रमइत्यमरः। शार्दूलविक्रीडि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गं हृतं ।२५। विस्तरभियाग्रंथविस्तरभीता प्रत्येकमेतासामिति । एतासां पूर्वोक्तानां नायिकानां
प्रत्येकं । एकां एकां प्रति न उदाहृता । उदाहरणत्वेन नोक्ता इत्यर्थः ।२६। एवं नायिकां निरूप्येदानीं
तस्याः सहायिनीरपि निरूपयन् सखीं दर्शयति । विश्वासेति । विश्वासं विश्रामं करोतीति सा ।
पार्श्वे समीपे चरतीति सा सखी । तस्या इति । तस्याः सख्याः मंडनं । अलंकाररचना । उपालंभः
सनिंदो वचनविशेषः । शिक्षा उपदेशाः । परिहासः उपहासः । यः सनिंद उपालंभ इत्यमरः ।
२७ । तत्र च मंडनमुदाहरति । स्तनकनकेति । कमलैः लीलाकमलैः सखीं जघान । कौतु
केन ताडनं चकारेत्यर्थः । किंभूतां सखीं । स्तनकनकेति । स्तन एव कनकमहीधरः स्वर्णपर्वतः
तस्य उपकंठे तत्समीपे । मकरिकाया मिषात् व्याजात् व्याजात् उल्लसत्प्रमोदं । उल्लसत्प्रमो
दो यस्य सततं । सकौतुकमित्यर्थः । प्रियस्य करपल्लवं रहसि एकांते लिखंती । पुष्पिताग्राछंदः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८॥ उपालंभमुदाहरति। सांद्रध्वानैरिति। हे नाथ स्वामिन् सांद्रध्वानैर्निरंतरध्वनिभिः। मुखरिता

दिशो याभिस्तास्तां तोयदानां मेघानां श्रेणयः पंक्तयः धारासारैः धाराणां आसारैः संपातैः धरणि

वलयं भूमंडलं सर्वतः प्लावयंति तेन त्वं हे त्वं नाम मत्सखी उक्तमेव अखंडितमेव विपुलं म

हांतं स्नेहं वहति। मद्वियोगमशक्नुवन्नकां [illegible]

[illegible] तो मेव लोकनेन समागमिष्यतीति मत्वेति भावः। त्वं निःस्ने

हः स्नेहरहितः तत्त्वदिदं मे मम विस्मयाय आश्चर्याय। तादृशो जने भवानेवंविध इति विस्मय

स्पर्धः। मंदाक्रांताछंदः। २९॥ अथ शिक्षामुदाहरति। सानंदमिति। काचित्सखी वदति। हे

आलि सखि वनमालि विलोकनाय श्रीकृष्णदर्शनाय सानंदं यथास्यात्तथा कुंजं निर्गच्छ।

किंतु। इति विचारयेथाः विचारं कुर्वीथाः। इति किं। तत्राह। झंकारिणो झंकारध्वनियुक्ताः

र॰टी॰
५८

मधुलिहो भ्रमराः दिवसे भ्रमंति। पुनः रात्रौ च पलानि चंचुपुटानि येषां ते चकोराः चंद्रिकाप्रिया भ्रमंतीत्यर्थः। तवांगसौगंध्यमुखचंद्रिकास्वादनार्थं भ्रमद्भ्यां मधुलिट्चकोरशब्दाभ्यां बहुलज्ज न प्रतीतिर्दृश्यते। तेन सायं समयो यातं योग्य इति तात्पर्यार्थः। वसंततिलकं छंदः। ३०॥ परिहा समुदाहरति। आगारेति। सीता जानकी इत्थं सखीजनस्य वचः श्रीरामस्य द्दिश्यपोक्तं। प्रतिपद्य प्राप्य श्रुत्वेत्यर्थः। स्मितस्य द्युतिभिः उत्तरयांचकार। हास कांतिभि रुत्तरं ददावित्यर्थः। इत्थं कथं। आगारं गृहं। तद्भित्तिलिखितास्तु। लोकभर्तुर्भुवनपालकस्य श्रीकृष्णस्य दशावतारमूर्तिषु। मत्स्यकूर्मवराहनृसिंहवामनपरशुरामश्रीरामबलरामबुद्धकल्कि रूपास्तु स मम कः किं ना मेत्यर्थः। निवेदयस्व कथयस्व। भवनागारमंदिरमित्यमरः। वसंततिलकं छंदः। ३१॥ सख्याः परिहासवत् परिहासस्तु लक्ष्यं प्रियस्यापि परिहासः प्रियकृतपरिहास इत्यर्थः। यथेति तामुदा

५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरति। भ्रूसंज्ञयेति। दशनव्रणेनदूयमानस्तप्यमानो बिंबाधरो यस्याः सा राधा चिराय चिरका
लं वदनं आनमयांचकार। हसति। हे तन्वि। तनोति शृंगाररसमिति तन्वी तस्याः संबोधनं। भ्रू
संज्ञया सखीं दिशसि प्रेरयसि। परं वाग्भिर्वचनैर्न दिशसीत्यर्थः। इत्थं सखीषिणि श्रीकृष्णे वि
रहस्य भाषमाणे सति। अत्र दंतक्षतप्रकाशत्वेन परिहासः। वसंततिलकं छंदः। ३०॥ प्रियसेना
दिना। प्रियायाः परिहासं यथेत्युदाहरति। दिव्यमिति। शैलभुवा पार्वत्या इत्थं विहस्य जल्पितः
उक्तः शंभुः शिवाय कल्याणाय अस्तु। इत्थं कथं। दिव्यरूपशपथवादेन हारं निह्नुवानं वद
ति। हे शंभो। वारिजलं दिव्यं शपथविशेषः। कथं। यतस्तव मौलौ मस्तके सुरधुनी। यः शिर
सि गंगां वहति तस्य कथं जलदिव्यमित्यर्थः। पुनः। पावकोग्निर्दिव्यं कथं। यतः। तव तत्र विलो
चनं यो नेत्रेणाग्निं वहति तस्याग्निः कथं दिव्यमित्यर्थः। पुनः अहिः सर्पः कथं दिव्यं। सर्पा हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नी
४२

रुवांगे। यः सर्प्पालंकारस्तस्मात्कथं सर्प्पदिव्य मित्यर्थः। तस्मात्तद्धूतविधौ त्वयाऽनुषित स्थो रितोहा
रः परित्यज्यतामिति। शार्द्दूलविक्रीडितं वृत्तम्। ३३॥ सखीनिरूपणाय वृत्तीदर्शयति। दूरपेति। दू
रं दूतस्य भावः। दूतवणिग्भ्यां वेति सूत्रेण भावेयत्। तस्याः पारे पारंगच्छतीति पारंगमा। तस्या
इति। संघट्टनं द्वयोर्मिलनं संघट्टनं यथेत्युदाहरति। अंचतीति। काचित्कांतानयन कृतप्रति
ज्ञां दूती प्रतिवदति। दे हूति। रजनिः रात्रिः। अंचति प्राप्नोति तिमिरं अंधकारं इदं दंउदं चतिव
ऊ द्धति। मनोभूः कामः चंचति नृत्यति। युक्तंय त्वउक्तं तद्वशीकरणादिरूपमित्यर्थः तत्सज
नविस्मरेत्यर्थः। तस्मिन्नउक्ते मनोरक्तं प्रीति युक्तं विरचय अन्यथा विस्मरिष्यसीत्यर्थः। आर्यो
छंदः। ३४॥ विरहनिवेदनं यथेत्युदाहरति। चक्र इति॥ हे श्रीछत्रधात्रा ब्रह्मणा धरामंडले चं
द्रस्त्वी राधा नायिका। प्रदीपकलिकादीपज्योतिः चक्रे क्रियते स्म। तावता किं तत्राह। तस्याचं

४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टुर्व्यां राधायां दैववशात्‌ चरमापि अंतिमापि दशा अंतावस्थेत्यर्थः। दीपपक्षे दशावर्तिः प्रा
यो बाहुल्येन समुन्मीलति सम्यगुदेति। तत्र तन्तो हेतोः नतेन नम्रेण शिरसा उपलक्षिता ब्रू
मः। सर्वा अपि मिलित्वा निवेदयाम इत्यर्थः। सहसा आकस्मिकं तत्र राधारूपदीपकलिकायां
तथा नेनप्रकारेण स्नेहः प्रेम निक्षिप्यतां। यथा त्रैलोक्यं अंधतमो न भवति। भवत्स्नेहं विना
सर्ववस्तु निविडांधकारवल्लितं स्यात्‌ भवतीत्यर्थः। दीपपक्षे स्नेहस्तैलं। यथा तैलाभावेन निर्वा
णं यांती चरमाधिवस्यापि दीपज्योतिस्तैलदानेन प्रकाशत इति। शार्दूलविक्रीडितं वृत्तम्‌। ३९ ॥
नायिकां निरूप्येदानीं नायकं निरूपयति। शृंगारस्येति। उभयनिरूप्यत्वात्‌। नायिका नायिक
योर्निरूपणीयत्वात्‌। शेषं स्पष्टं। स च नायकः त्रिविधः त्रिप्रकारः पतिरित्यादि। उपपतिर्जारः
वेशे चरति वैशिकः। जारस्तूपपतिः समौ। वेशो वेश्याजनसमाश्रय इत्यमरः। तत्र पतिं दर्शय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
५०

ति। विधिवदिति। अभ्यादि साक्षित्वेनेत्यर्थः। पतिमुदाहरति। त्वमिति। शिवो वदति। हे पीयूषम
यूख। पीयूषं अमृतं मयूखाः किरणा यस्य स तत्संबोधनं अमृतकिरण चंद्रेत्यर्थः। शिशिराः
शीतलाः स्निग्धाः सांद्रा स्नानसुधाया याः अमृतस्य शीकरान् कणाः मुंच हे भोगींद्र सर्पराज
किमु विलंबसे। किंतु फणानां भोगैर्विस्तारैः शनैर्वीजय वायुं तत्त्वज्ञेत्यर्थः। किंच। भो स्वर्वाहिनि
स्वर्गंगे त्वं सलिलैः सिंच। यतः शिरीषोपमैः शिरीषपुष्पतुल्यैरंगैरुपलक्षितासा इयं शै
लसुता पार्वती करोरमहसः उग्रतेजसः सूर्यस्येत्यर्थः। कांता पथि मार्गे क्लाम्यति ग्लानिमा
प्नोति। पीयूषममृतं सुधेत्यमरः। स्निग्धं तु मसृणे सांद्र इति शब्दार्णवः। शार्दूलविक्रीडितं वृ
त्तं। २९॥ अथ पतिं विभजते। अनुकूलेत्यादिना। तत्रानुकूलं दर्शयति। सार्वकालिकेति। सर्व
काले भवं सार्वकालिकं। अध्यात्मादित्वाट्ठञ्। सर्वकालमनुरक्तः कदापि न कृत इत्यर्थः। शे

५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घंसप्ष्टं। यथेतितं दर्शयति। पृथ्वीति। सीतया सह प्रस्थितः श्रीरामो वदति। हे पृथ्वि त्वं कोमला भव। सीतायाश्चरणकमलयोरतीव कोमलत्वात्। हे दिनमणे सूर्य त्वं शैत्यं शीततां अंगीकुरु। उष्णतां परिहरेत्यर्थः। हे वर्त्मन् मार्ग त्वं लघुतां प्रयाहि शान्तुहि। हे पवनवायो त्वं खेदं श्रमं उत्सारय हरीकुरु। हे दंडकावनिगिरे दंडकया राक्षस्याधिष्ठितं अरण्यं वनं दंडकारण्यमित्यर्थः। तत्संबंधिन् गिरे सान्निध्यं श्रयनैकट्यं कुर्वित्यर्थः। किंच। मार्गाद्बहिर्निर्गच्छ मार्गपरित्यज्य दूरे तिष्ठेत्यर्थः। यतः। असौ सीता मया सह निर्गंतुं उत्कंठते वांछतीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्। ३७॥ अथ दक्षिणं दर्शयति। सकलनायिकाविषयकः समः सहजानुरागो यस्य सः। यथेतितमुदाहरति। एतदिति॥ गोपीजनमध्यसंतमात्मानं निरीक्ष्य श्रीकृष्णः सखायं वदति। एतत्सु मृदृशां सुंदरीणां सहस्रं पुरोग्रे स्फुरति प्रकाशते। उ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
५१

त्रकस्यां विषये अक्षिद्वयं निवेशयामि त्वं कथय। समानुरागात्त्वे नाहं नेत्रद्वयं कथं युगपन्निवेशयामिति। विप्रतिपत्तौ प्रश्नः। इति आकलय्य विचार्य रामो चितेन वपुषा उपलक्षिते न अच्युतेन श्रीकृष्णेन नयनांबुरुहे नेत्रकमले निमील्य स्थितं। न किंचिदुक्तमित्यर्थः। रतेरेकत्रानवस्थायानी रसत्वं चिंत्यं। तथा च गीतगोविंदे॥ श्लिष्यति कामपि कामपि चुंबति त्यत्रापिनी रसत्वं। वसंततिलकं छंदः। २०॥ अथ धृष्टं दर्शयति। भूयइति। कापि सखीवदति। भूयो वारंवारं निःशंकं यथास्यात्तथा कृतदोषोपि कृतापराधोपि भूयो निवारितोपि नात्रागंतव्यमित्यादिना वचनेन। भूयः प्रश्रयेविनये परायणो दत्तमना इत्यर्थः। यथेति धृष्टमुदाहरति। बद्धइति। मया हारैः करकमलयोर्बद्धोपि। पुनः। द्वारतो द्वारात्त्वं वारितोपि स्वापं निद्रां ज्ञात्वा पुनरुपगतः समीपं प्राप्तः। ततो दूरतो दूरात्त्वं दत्तात्प्रेरितात्क्षिप्तो येन सः।

५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मङ्गावंस्थातुमिच्छये तिभावः। पुनः। तल्पोपांतेशय्यासमीपे मुक्तंस्थापितं कनकवलयं। या
त्रैोनालंनात्वष्पादित्यागमोक्तत्वादितिभावः। यद्वा। मुक्तं। एवंभूतस्यापि विरहेणकृशत्वात्प
तितमित्यर्थः। अन्वेषयंत्या। अन्वेषणंकुर्वंत्यामयापार्श्वेप्रसुप्त एव दृष्टोधृष्टः। मंदाक्रांताछं
दः। २९॥ अथ शठंलक्षयति। कामिनीत्यादि। स्पष्टं। यथेतिशठमुदाहरति। शठइतिअध्या
हारः। मौलौशिरसिदाममालां विधायकृत्वा। पुनः भालफलकेललाटपट्टे पत्रावलीव्या
लिख्य। पुनः भुजयोः केयूरंनिधाय। पुनः कुचयोः मुक्तास्रजंविन्यस्य। हृगदृष्णेनायिका
याः विश्वासंसमुपार्जयन् उत्पादयन् कांचीनिवेशछलात्। कांच्याः क्षुद्रघंटिकायाः निवेशो
यथास्यानापक्षेपरत्नछलात् तद्व्याजात्। मृदुनाशनैःशनैः करणरूपेणहस्तेन वामक्र
मेणकश्चिन्नीवीग्रंथिं अपाकरोति रंतुमिच्छया पविहरतीत्यर्थः। नायकस्योत्तममध्यमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०टी०
५२

धमत्वे दक्षिण शठधृष्टा इति निरूपणीयत्वेन अनुक्रमस्तु धृष्टशठ इत्य समीचीनः॥ शार्दूलवि
क्रीडितं वृत्तम्॥५०॥ उपपत्तिं लक्षयति। आचारेति। आचारस्य आप्तोपदर्शितमार्गस्य हानि
हेतुर्नो शङ्काहेतुरित्यर्थः॥ उपपत्तिमुदाहरति। शंकाशृंखलितेनेति॥ कामिनी च कामी च का
मिनौ तयोः तत् किं रतं अद्भुतमित्यर्थः॥ तदेवाह। यत्र रते। शंकया शृंखलितेन बद्धेन नयन
प्रांतेन न प्रेक्ष्यते। यत्र वा रते। केयूरध्वनिना भूरि अधिकं यथा भीतिस्तया चकितं यथा स्या
त् नो श्लिष्यते नालिंग्यते। यत्र वा। अलग्नादशनादं तायस्मिन्नतत् अलग्नदशनं यथा
शनैर्मंदं मंदं बिंबाधरो नो पीयते। यत्र वा मणितं रतिकूजितं न विधीयते न क्रियते। प्रच्छ
न्नकामित्वादिति भावः॥ शार्दूलविक्रीडितं वृत्तम्॥५१॥ उपपतिरपि चतुर्द्धा चतुः प्रकारः।

५२

परे अनुकूलादयो
अनुकूलाद्युक्तभेदैरित्यर्थः॥ परं तु शठत्वं तत्र तेषु नियतं निश्चितं।

KKSU LIBRARY
RAMTEK
441 106
M-1498
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियताः ॥४२॥ अथ वैशिकं दर्शयति। अदभ्रं बहुलं बर्हिणः मयूरः। यथेति तमुदाहरति। कां
चीति। कश्चित्सखायं वदति। वारविलासवत्याः वेश्यायाः कमपि अनंगारंगं कामविलासं
आशास्महे वांछामः। किंभूतं अनंगरंगं। कांच्याः कलक्वणितेन मधुरस्फुटध्वनिना कोम
लामधुरा नाभेः कांतिर्यस्मिन् तं। पुनः पारावतानां ध्वनितेन कूजितेन विचित्रिता कंठपा
लिर्यत्र। नानाविधरतिकूजितचातुर्यो दितिभावः। पुनः। उद्भ्रांतौ लोचनचकोरौ यत्र तं।
मन्मथसुखचंद्रिकापानार्थमिति भावः। वसंततिलकं छंदः ॥४३॥ वैशिकं विभजते। वैशि
कस्त्रिविधः स्पष्टं। तत्रोत्तमे वैशिकं लक्षयति। दयितायाः स्पष्टं। यथेति तमुदाहरति।
च क्षुरिति। कांतः पक्ष्मलदृशः। प्रशस्तानि पक्ष्माणि यस्यास्तादृशी दृग्यस्यास्तस्या नायिका
याः शोणारविंदश्रियं शोणारविंदस्य रक्तकमलस्य श्रीः शोभा यस्मिन् तं कोपोदयेनेति भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
४२

वः। नेत्रपांतं उदीक्ष्य। कुड्मदृष्ट्या उच्चैः अधिकं न जल्पति। स्मितं हास्यं न वितनुते न विकासयति।
न वा वीटीं गृह्णाति। किंतु तल्पोपांतं शय्यासमीपं उपेत्य प्राप्य चुलकैः भ्रंजंती कपोलयोर्द्ध
तिर्यस्य सः। केवलं एकं यथा स्यात्तथा आननेन शिरसा उपलक्षितः खुक्कास्वज्जं घ्रफति
तमीत ये ग्रथ्नातीत्यर्थः। शार्दूलविक्रीडितं वृत्तं। ४४॥ मध्यमं लक्षयति। प्रियाया इति। स्पष्टे।
यथेति तमुदाहरति। कश्चिन्मध्यमनायको नायकां प्रति वदति। यद्यपि इदं आस्यं हास्यव
र्जितं। पुनः। लास्येन गीतादिना वचो वचनं वीतं रहितं। पुनः। शोणसरोजस्य कांतिर्यस्मि
न्तत्तन्नेत्रं। कोपेनेति भावः। तदपि क्वापि प्रदेशे क्षणं त्वया स्थीयतां। कोपं परित्यज्य माह
शे प्रदेशे विश्रम्यतामित्यर्थः। यतः। हृदृशा त्वबसायं ततः संध्याभवइति सर्वत्र योज्यं। मा
लायाः करणोद्यमो दृश्यते। पुनः ऊ चाभोगयोः मकरिकारंभः चित्ररचनाविशेषः। आभोगो।

४२

103

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

विस्तारः। पुनः कुंतलपोरलीषु केशसमूहेषु धूपः। अगुरुचंदनादिभिरधिवासितः। इत्यपतइ
ति सर्वत्र संबंधः। सायं मालादिप्रसाधनं मत्संगप्राप्यर्थं अत एव मुदासितायास्तव हस्तव
र्जितादिव्यर्थमेवेत्यर्थः। शार्दूलविक्रीडितं वृत्तम्। ४५॥ अथाधमं लक्षयति। भयरूपेत्या
दिस्पष्टं। यथेति न मुदाहरंति। उदयतीति॥ काचित्सखीं वदति। हे सखि यस्य हृदि लज्जापि
नैव उदयति। इएगताविति अस्य रूपं नोदच्छति। करुणापि मद्विषयिका दयेत्यर्थः। कोपिभी
तिलेशोनच। तस्य एवंभूतस्य करे पुनरपि अतःपरमपि बकुलमुकुलानां कोशोमधुभा
गस्तद्वत्कोमलां मां न पातयेथाः न प्रापयेथाः। पुष्पिताग्रा छंदः। ४६॥ प्रसंगादन्यदप्याह॥
मानीति। अवमानितश्चनार्या विरज्यते सततं भवेऽल्पेषु इत्यादिभिरनवाक्यान्मानित्वं। चंच
स्तुवक्ष्यमाणलक्षणः। तयोः शठे एवांतर्भावः। मानी यथेति न मुदाहरंति। बाह्याकूतेति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
५५

हंतेति खेदे। वामभ्रुवः। वामे मनोहरे भ्रुवौ यस्यास्तस्याः हरिणादीनां दृष्टयः प्राणेशे कांतेनिप
तंति विश्राम्यंति। हे कांत तव वचो वचनं। बाह्याकूतपरायणं। बाह्यं बहिर्भवं यत् आकूतं अभि
प्रायस्तत्परायणं तत्प्रधानं। मनो वज्रोपमेयं वज्रतुल्यं। अतो वज्रमनसस्तव वचनं सर्वं मि
थ्येत्यर्थः। इमां उक्तलक्षणां वाचं श्रुत्वा विनयं अपास्य त्यक्त्वा प्रातः प्रभाते व्याजालेन निमिष
णेत्यर्थः। बहिर्गृहाद् इत्यर्थः। प्रस्थिते चलिते। पुनः। वीतविलोकने वीतं त्यक्तं विलोकनं येन तत
स्मिन्। पुनः। परिहृत त्यक्त आलापो येन तस्मिन्। पुनः। विहतं परिवर्तितं आननं येन तस्मि
न्। आलापो भाषणं मिथ इत्यमरः। शार्दूलविक्रीडितं वृत्तम्। ५७॥ चतुरमुदाहरति। वागिति।
वाक् च अंगं च पसमागमश्च चेष्टा अंगपसमागमश्च चतुरः। तत्र वाचा अंगपः समागमो यस सव
कृत्यंगपसमागमः। यथेति तमुदाहरति। तमो जदालइति। कश्चिन्नायिकां प्रति वदति। देशा

५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोदरि। क्षांतं कृशं उदरं यस्याः सा तत्संबोधनं। निशायाः काले समये तमोऽट्टाले। तमसां अ

ट्टालाः प्ररोहा यस्मिन् एवंभूते हरिदंतराले हरितां दिशां अंतराले मध्ये विनिर्गतायास्तव

वनीनां निकुंदे नदीनां तटे कः सहायो घटेत। वस्तुतो हमेव चतुरइत्यर्थः। इंद्रवज्रोपेंद्रव

ज्रामिश्रितपादत्वादुपजातिच्छंदः। १७॥ चेष्टायाव्यंग्यः समागमो यस्य सः। यथेति त स्मुदा

हरति। कांतइति। कांते कनकजंबीरं स्ववर्णजंबीरं फलविशेषं। किमपि वैचित्र्यपूर्वकं

करे हस्ते कुर्वति सति। इंदुमुखी नायिका आगारलिखितभानौ गृहभित्तिलिखितस्वि

त्रसूर्ये बिंदुं तदर्शकरूपं ददौ दत्तवती। एतेन भान्वाछादकबिंदुदानेन सूर्यास्तसमय

समये तव मया सह क्रीडासंकेत इति व्यज्येत। अनुष्टुप्छंदः। ४९॥ प्रसंगादन्यदप्याह। प्रो

षित इति। पातीति पतिः स्वामी। उपपतिर्वैशिकश्च प्रत्येकं प्रोषितो भवति। क्रमेणोदाहर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृं·टी·
५५

एणानीति। प्रोषितपतिमुदाहरति। दुद्धरं मेति॥ कश्चिद्विरही नायिकामनुस्मरन्नाह। हंतेति खेदे। सा नायिका चेत् यदि त्वरसि मम हृदये वर्तते इत्यर्थः। तदा तापस्य विरहजनितस्य शांतिः कथं न। शांत्युपायमेवाभिनयपूर्वकमाह। यस्मान्नायिकायाः दुर्वोदिषु सर्वत्र संबंधः। ऊरू रंभा कदली। दृगपि दृष्टिरपि कमलं। केशपाशः केशसमूहः। पाशः पक्षस्य हस्तस्य कलापार्थः कचात्सरइत्यमरः। वक्त्रं मुखं चंद्रः। लपितं वचनं अमृतं। मध्यदेशो मृणालं बिशं। नाभिः कूपः। बलिरपि त्रिवलिरपि सरित्। किंच। पाणिः पल्लवः। इत्थं शीतलसामग्र्या सत्यामपि मत्तापशांतिर्न भवतीति मद्भाग्यविपर्यय एवेत्यर्थः। मंदाक्रांता छंदः। ५०॥ उपपत्तिं प्रोषितमाह। यांत्या इति। सलिलकेलिकुतूहलाय। सरः सरोवरं यांत्या वामदृशः सुंदरनेत्राया व्याजात् किंचिदुद्दिश्येत्यर्थः। उपेत्य समीपमागत्य वर्त्मनि वर्तमाने मयि अंतःस्मि

५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्धूर्तिभिः चमत्कृताये हृत्कृतरंगास्तैः अंगीकृतं स्वीकृतं किमपि संकेतचेष्टितं स्मरामि।
वसंततिलकं छंदः।५१॥ वैशिकं प्रोषितपतिमाह। अधूतेति। पुरस्त्व हशो वेश्यायाः स्मर
चेष्टितं स्मरामि। किंभूतं। अधूतो नकृतः परिपततो निचोलस्य बंधो ग्रंथिर्यस्मिन् तत्। पु
नः मुषित श्रोतितो नकारो यत्र तत्। पुनः। अवक्रो ऽकुटिलो दृष्टिपातो यत्र तत्। पुनः प्र
कटं हसितं यत्र तत्। पुनः। उन्नतं आस्यबिंबं मुखमंडलं यस्मिन्। अधूतादिषु सर्वत्र
धृष्टत्वादिति भावः। पुष्पिताग्रा छंदः।५२॥ प्रसंगादन्यदप्याह। अनभिज्ञ इति। संकेतादि
चेष्टितं अभिसमंतात् न जानातीति एवंभूतो नायको नायकाभः। नायकवदाभासते। त
मुदाहरति। शून्य इति। कापि दूतीं वदति। हे दूति शून्ये सद्मनि एह बहुविधा बहुप्रकारा
भंगिः अंगरचनायोजिता कृतेत्यर्थः। पुनः। निर्जनं जनरहितं वनं। अथानंतरं। पु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
२६

व्यपाजं उपेत्य प्राप्य निर्गतं बहिर्निःसृतं। मयेति शेषः। पुनः। हृष्ट्यः स्फारीकृताः विकाशिताः
पुनः। तांबूलस्य आहरणछलेन यद्गमनं मिषेणैव क्षौरुहौ स्तनौ यस्य कौ विहितौ कृतौ। एतेना
पि उक्तप्रकारेण न वेत्ति न जानाति। तर्हि कियता यत्नेनस्य नायका भासो ज्ञास्यति। ममाभिल
षितमित्यर्थः। शार्दूलविक्रीडितं वृत्तम्। ४२॥ प्रासंगिकमन्यदपि निरूपयति। न वेत्ति। नेतृभे
दाः इति उक्तादय इत्यर्थः। तस्या नायिकायाः अवस्था या भेद उक्ताः दिलङ्केदेन भेदाः। विशेषः का
लिकावस्थेत्यमरः। तस्य च नायकस्य स्वभावः प्रकृतिस्तद्भेदेन भेदाः। इति उभयोर्विशेषात्।
४३॥ के ते स्वभावा इत्यत आह। अनुकूलत्वमित्यादि अन्यचेतसादिस्वीकर्तव्यमाइत्यंतं स्पष्टं॥
४४॥ तथा चेति। असंप्रदायात् प्राचीनसंप्रदायाभावादित्यर्थः। कुत एतदित्याह। अन्येत्या
दि। अन्यस्याः अपरस्याः समागमस्तत्स्पर्शकादिना तर्कस्तेन धूर्तत्वं वा अन्यस्याः संभोगचि

२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ति न लंबाना यकानां। नवनायकानामित्यर्थः। प्रस्तुतसंप्रदायमनाहृत्येत्यर्थः। तत्र उद्भा
वने तेषां नायकानां तासां उत्का द्यवस्थानां उद्भावने उद्घाटने रसाभासापत्तिः शृंगारहा
निप्राप्तिरिति अनौचित्यादित्यर्थः। उक्तं हि। अनौचित्यादृते नान्यद्रसभंगस्य कारणमिति।
५५॥ प्रासंगिकमन्यदप्याह। तेषामिति। तेषां नायकानां नर्मणा अनुकूलहासादिव्यापा
रेण स वृत्ति यो जयति स नर्मसचिवः। हास्यसख इत्यर्थः। सचिव इति षच संगे धातोरुण
दि प्रत्यये साधुः। सः पीठमर्दादिभेदात् चतुर्द्धा। चतुःप्रकार इत्यर्थः। ५७॥ कुपितेति। कु
पिता चासौ स्त्री चेति तां प्रसादयतीति प्रसादकः प्रसादयिता। पीठं चरणनिवेशस्थानं
मृद्नातीति सः। कोमलौ न वचरणौ कथमनुदनाविलादिहासेन स्पर्शनं भवतीत्यर्थः।
यद्वा पीठं शृंगारादिरसरूपं मृद्नाति आलोडयतीति। यथेति तमुदाहरति। कोय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
७

मिति। हेमानिनि अयं कोपविधः कः। आत्मनः प्रतिकूलत्वात् कुत्सितोयं परित्याज्य इत्यर्थः।
किंतु करुणादयागर्भे यस्तत्त्ववचोवचनं मयच्छन्निये प्रकटयेत्यर्थः। अत एव त्वद्वचोयः पी
यूषद्रवः अमृतप्रवाहस्तस्य दीर्घिकातस्याः परिमलैर्गंधविशेषैर्मेदिनी भूमिः आमोदिनी ज्ञा
यतां। वा अथवा। हे सुंदरि आस्तां कोपविधिः। यतः स्पृहयालु स्पृहाशीलं इदं लोचनं नेत्रं मु
हुर्वारंवारं व्यावर्तयंती रज्वा कृष्टमिव परावर्तयंतीय स्यै कांताय कुप्यसि तस्य तव कांत
स्य तपोवृंदानि तपः समूहान् वंदामहे। निरवद्यतपः समूहं विना तादृक्कोपप्रसादपा
त्रस्यालभ्यत्वादिति भावः। यस्यै कुप्यसीति। क्रुधद्रुहेति सूत्रेण चतुर्थी। शार्दूलविक्रीडितं
वृत्तं। ५०॥ विटं दर्शयति। कामतंत्रेति। कामस्य तंत्रं सिद्धांतं तस्य कलाभेदास्तत्र कोविदः प्र
वीणो विटः तंत्रं प्रधाने सिद्धांत इति विश्वः। यथेतितस्य दाहरति। आयात इति। हे कृशोद

७

111

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिऊमुदेश्वरश्चंद्रः आयातः उदित इत्यर्थः। सर्वेश्वरः सर्वेषां ईश्वरः प्रेरकः वायुर्विजयते।
विशेषेण शीतमंदसुगंधिरूपेण जयतीत्यर्थः। विपराभ्यां जेरित्यात्मनेपदं। भैरवो भ
यानकः। विरहव्यथाजनकत्वात्। भृंगो भ्रमरः स्फूर्जति इतस्ततो झंकारशब्दं कुर्वन् भ्र
मतीत्यर्थः। प्राणेश्वरः प्राणवल्लभो निकटं न मुंचति। ततः किमित्यत आह। एते ऊमुदेश्व
रादयः सिद्धरसाः। सिद्धो निष्पन्नो रसः शृंगारो येषां ते। प्रसूनविशिखः पुष्पबाणः काम
इत्यर्थः। अनवद्योत्सवः। अनवद्यः अनिंद्यः उत्सवः तत्र रूपव्याधिनाशकवैद्यचिकित्सा
रंभो यस्य सः। असौ दृश्यमानो मान एव व्याधिः। त्वं ज्ञातासि तव मनसि कथं केन प्रकारे
ण स्थास्यति न स्थास्यतीत्यर्थः। अथ च रसग्रंथेषु ऊमुदेश्वर सर्वेश्वर सर्वेश्वर भैरव प्राणे
श्वर रसेषु सिद्धेषु व्याधिर्न तिष्ठतीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्। ५८॥ चेटकं दर्शयति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संधानेति। संधाने संयोजने चतुरश्चेटः। यथेति तमुदाहरति। सा चंद्रेति। सा प्रसिद्धा चंद्रवन्मुखं
दरमुखी नायिका। स प्रसिद्धः सकलकलाभिज्ञो नंदसूनुर्नंदगोपतनयश्च। दैवात् अनि
र्देशेनेत्यर्थः। निकुंजभवनं कुंजगृहं समुपाजगाम। अत्रांतरेति। अस्मिन्नवसरे तयोर्मि
लनसमय इत्यर्थः। सहचरतीति सहचरः सखा तरणौ सूर्ये कठोरे तीव्रे सति पानीयस्य
जलस्य पानकपटेन सरः तडागं प्रतस्थे। मयि स्थिते तन्मिलनांतरायं जानन् प्रस्था
नं कृतवानित्यर्थः। वसंततिलकं छंदः। ६०॥ विहृपकं दर्शयति। अंगादीति। स्पष्टं। यथेति
तमुदाहरति। आनीयेति॥ कश्चिन्नायको वयस्यं प्रति वदति। नीरजमुखी नायिकां शय
नोपकंठं शय्यासमीपं आनीय कुचकंचुकमोचनाय उत्कंठितोस्मि। अत्रांतरे विदूषकेन
प्रातस्तनः प्रातर्भवस्तरुणः कुक्कुटः कंठनादो मुहुर्वारंवारं अकारि कृतः तया चेष्टितस्य।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दूरान्तेऽपि प्रभातभांत्साहास्पकाविलात्। वसंततिलकं छंदः। ६१॥ एवं शृंगाररसं निरूप्य सात्वि
कभावान् दर्शयति। स्वेदः स्तंभ इति। यथेति। सर्वानपि विस्तरभिया एकेनैव पद्येन दर्शयति।
भेदो वाचीति। काचित् सात्विकभावयुतां गोपीं स्तौति। हे सुंदरि स प्रसिद्धः कोटिकंदर्पलाव
ण्यः। व्रजेंद्रस्य नंदस्य तनयः पुत्रः कृष्णः त्वया किं आलोकितो दृष्टः यतः वाचि वाग्विषये
भेदः स्वरभंगो गद्गदत्वेत्यर्थः। सखुजृंभते प्रकाशते इति मनो विना पदेषु योज्यं। दृशोर्नेत्रयो
र्जलं आनंदास्रु। ऊरुतटे स्वेदः। अतिकठिनमपि कुचतटं प्रस्वेदयुक्तमित्यर्थः। अधरे प्र
कंपः। चुंबनलालसत्वेनाधैर्यवतोऽधरस्य कंपनमित्यर्थः। गंडतटी पांडुः। तद्विरहता
पात्। कपोलस्थलं वैवर्ण्यमित्यर्थः। वपुर्गात्रं पुलकितं तत्स्मरणानंदादिति भावः। मनो
लीनं नष्टचेष्टं तिष्ठति। प्रलयो नष्टचेष्टतेत्यमरः। नयनश्रियो नेत्रलक्ष्म्या आलस्यं तद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
५९

वलोकनव्यतिरेकेणान्यत्रदर्शनायोग्यत्वात्। पुनः चरणयोः स्तंभो जडता। सकलकला निधेस्तादृशस्यावलोकनं विनैतादृशावस्थानुदयादितिभावः। अत्रानुमानालंकारः। शार्दूलविक्रीडितं वृत्तम्॥६३॥ अथशृंगारं दर्शयति। रतीति। रतिः स्थायिभावोयस्यस शृंगारः तथाचभरतः। रतिर्हासश्चेत्यादि। सचशृंगारो द्विविधः। द्वैविध्यं प्रकारौ यस्यसः संयोग विप्रलंभरूपेण संयोगः संयुक्तयोः स्त्रीपुंसयोरालिंगनादिरूपः संभोगः। विप्रलंभः वियुक्तयो रभीष्टाप्राप्तिरूपोवियोगः। ६४॥ तत्रसंयोगोयथेति। संयोगमुदाहरति। वियतीति। वियतिअंतरिक्षे जलदो मेघो विलोलति लुलविमर्देधातुः। विधुश्चंद्रः स्खलति पतति चेष्टते चलति। कपोतः पक्षी कूजति शब्दायते तारकाणांनक्षत्राणां ततिः समूहो निपतन्नतति। अमरवाहिन्यागंगाया वीचिस्तरंग आंदोलति। आंदोलस्त्वाचर

५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति। चुराद्देरनितरपतापिजभावः। प्रस्तुतेर्थे अलदादीनामनुपयोगात्। जलदेन। अमज्ज
लयुतकेशपाशो नायिकायाः। विधुनामुखचंद्रः कपोतकूजनेन कंठध्वनिः। नक्षत्रनिप
तनेन हारत्रुटिः। केशग्रथितपुष्पपातोवा। गंगावीच्या मुक्ताहारलतांदोलनं। उपरिव
र्तमानत्वादमरवाहिनीति विशेषणं। एतेन विपरीतरतिरूपः संभोगो ध्वन्यते। आर्याभे
दोगीतिछंदः। ६९॥ विप्रलंभो यथेति तमुदाहरति। प्रादुर्भूतइति। कापि सखी विरहिणं
प्रियंवदति। हेविरहिन्। त्वमथं तव पंथास्त्वमथः तं द्रष्टुकामाः पंकेरुहदलदृशः क
मलपत्रनेत्राया नायिकायाः प्राणाः कंठदेशं प्रयांति। प्रकर्षेणप्रादुर्भवंति। अन्यच्च। अ
न्यदपि। तवमुखविधुं मुखचंद्रं द्रष्टुं वक्षः उरःस्थलं उड्डीय गंतुं विशिन्याः पद्मिन्याः
पल्लवस्पंदनेन किंपक्षं सृजति। अन्यथा वक्षस उड्डीनासंभवात्। बिसिनी पद्मिनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
६९

मुखोद्गमरः। अत्रोत्प्रेक्षालंकारः। मंदाक्रांताछंदः।६६॥ विप्रलंभे चाभिलाषादयो दशावस्था
भवंति। ताःस्वयमेव स्पष्टयति।६७॥ तत्रेति। तत्र तासु। संगमस्य मिलनस्य इच्छा अभिलाषः।
यथेति लक्षयति। तस्यामिति। कश्चित्पूर्वानुरागी नायको वदति। तस्यां प्रसिद्धायां रूपलावण्या
दियुतायामित्यर्थः। सुतनुरेव सरसी सरलस्यां चेतो नयनं च निःपतितं मग्नं। तत्र चेतो मान
संगुरुअंतो निलीनं ब्रुडितं। नयनं तु लघु सर्वतो भ्रमति। मच्चेतस्तस्यामेव लग्नं नेत्रं तद्द
र्शनलालसं तदुपर्येव भ्रमतीत्यर्थः। आर्याभेद उपगीतिः।६८॥ चिंतामाह। दर्शनं च संतोष
श्चैतौ नयोः प्रकारस्य प्रतिक्रियाया जिज्ञासा ज्ञातुमिच्छा तस्याः चिंतनं स्मरणं चिंता। यथेति
तामुदाहरति। मयेति। मया तस्मिन्कुंजोपकंठे कुंजसमीपे अद्य कलकंठानां कोकिलानां
नादो विधेयः कर्तव्यः। यतः। राधा कर्ज्ञामधोर्वसंतस्य विभ्रमं भ्रांतिं आवहंती। नेत्रोत्पल

६०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोरणानि। नेत्रे इतस्ततश्चालिते एव संतदर्शनार्थं ते एव तोरणानि वृंदनमालाः कुर्वीत। वि
भ्रमो भ्रांतिर्हावयोः दिति मेदिनी। इंद्रवज्रोपेंद्रवज्रयोरुपजातिः।१९॥ अथ स्मृतिं दर्शय
ति। प्रियाश्रितेति। प्रियं इष्टं न दाश्रितया उद्बोधितो यः संस्कारस्तज्जन्यं ज्ञानं स्मृतिः। यथे
ति नाम्नुदाहरति। राम इति। लक्ष्मणस्य यत्नदीर्घ पंडुः खं शस्त्राघातपातनरूपं तेन चकि
तो व्याकुलो रामो व्यथां दुःखेन आविः करोति प्रकटयति। यतः स्वांतं उन्मत्तरं अस्तु संन
जहाति वा अथवा चक्षुषि ज्ञानाभेकवचनं। नेत्रयोः सलिलं न धत्ते नेत्राभ्यां न दधातीत्य
र्थः। किंतु विदेहराजो जनकस्तस्य तनयां सीतां भूयो वारं वारं स्मरन्वर्तते तिष्ठतीत्यर्थः।
किंभूतो रामः वातावर्तनवातभ्रमेण विवर्तमानो यो दहनोग्निस्तद्वत्क्रूरैः अनंगज्वरैः का
मसंतापैः क्षामः क्षीणः। शार्दूलविक्रीडितं वृत्तम्।२०॥ गुणकीर्तनं दर्शयति। वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
६१

रहेति। विरहकालीनं विरहभवं कांताविषयेयत्प्रशंसायाः स्तुतेः प्रतिपादनं गुणकीर्तनं। संभोगेपि गुणकीर्तनपरिहाराय विरहकालीनेति विशेषणं यथेति तमुदाहरति। स्पर्शइति। कश्चन विरहीवदति। हे सखे स्पर्शः स्पर्शनव्यापारश्चेत् तस्या नायिकायास्तनतटस्पर्शः वीक्षणं दर्शनव्यापारश्चेत् तस्याववक्त्रवीक्षणं। समयः कालयापनं चेत्। तस्याः केलिकथालापसम येभवतितिसर्वत्रयोज्यं। अनुष्टुप्भेदः।७२॥ उद्वेगं दर्शयति। कामक्लेशेति। कामक्लेशेनजनितं यत्सकलविषयके हेयताज्ञानं सउद्वेगः। यथेतितमुदाहरति। कश्चिद्विरहीवदति। इंदुबिंबं चंद्रमंडलं गरलद्रुमस्य विषवृक्षस्य कंदं मूलं। किंच। वसंतः कर्ता। करुणैव वारिजं कमलं तस्य वारणः गजइव। वसंते हि कमलानामभावो हि भवतीति। किंच। रजनीरात्रिः स्मरभूपतेः कामस्य राज्ञः कृपाणीशस्त्री। कृपाणीकर्तरीसमइत्यमरः। प्रस्तुतमाह। हेविधातः

६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परं किं करणीयं। एतेषामसहत्वादिति भावः। औपच्छंदसिकं छंदः। २२। प्रलापं दर्शयति। प्रिया
श्रितेति। प्रियाश्रितो यः काल्पनिकः कल्पनानियुक्तो व्यवहारः स प्रलापः प्रलापोनर्थकं वच
इत्यमरः। अंतःकरणस्य मनसो विक्षेपो व्यापारः। तस्य विक्षेपस्य निदानं कारणं उत्कंठा औ
त्सुक्यं। यथेति तमुदाहरति। अर्द्धसमिति। काचित्सखीं वदति। अघमे च क्षुर्नेत्रं। अर्द्धसंवी
क्षणं नद्वयोः संवीक्षणं यत्र तत् किं कदिष्यतीति मन आदिष्वपि योज्यं। मनः अर्द्धसंमिलनं।
न द्वयोः संमिलनं यत्र तत्। किंच। पाणिर्हस्तः अर्द्धसंस्पर्शनः। न द्वयोः संस्पर्शनं यत्र। तदति
रिक्तानां वक्षुरादीनां का कथा भविष्यतीत्यर्थः। अत्र षट् प्रभेदः। २३। उन्मादं दर्शयति। औत्सु
क्यात्संकल्पासहिष्णुत्वं। संतापः संज्वरः। आदिना भ्रमादिः। एतैः कांतो यो मनोविपर्यासो
व्याकुलता तस्मादुत्पन्नः। प्रियाश्रितो यो व्यथाव्यापारः। निरर्थक उद्यमः। स उन्मादः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰टी॰
६२

व्यापारोपि कायिको दैहिकः। वाचिको वाग्भवश्च। तत्र कायिको यथेति कायिकमुदाहरति। प्रति फलमिति। कोपि नायकः अमृतांशोश्चंद्रस्य प्रतिफलं प्रतिबिंबं प्रेक्ष्य अवलोक्य मृगाक्ष्या नायिकाया मुखमिति किमिदं मुखं इति परिहासं कर्तुं अभ्युद्यतो भूत्। अथानंतरं शिथिलितवाकः त्यक्तवाक्या यास्तस्यामानं आशंक्य मुकुलका निरोमांचा न्भजत इति तेन पाणिपंकेरुहेण हस्तकमलेन स्पृशति। अनुनयार्थमिति भावः। अत्र संशयालंकारः। मालिनीछंदः॥ ७४॥ वाचिको यथेति वाचिकमुदाहरति। किं रे विधो इति। रे विधो चंद्र किं दृप्यसि। मृगदृशो नायिकाया मुखं अद्वितीयं निरुपमं। पुनः रे कंदर्प काम किं दृप्यसि। मृगदृशः एतत् दृगंबुजं नेत्रकमलं अस्ति। तव पुष्पबाणत्वात् एतत्कमलतुल्यं न भवतीति किं गर्वमावहसीत्यर्थः। पुनः रे भृंग भांकारं किं आवहसि। यतस्ता दृशी तनुस्तन्वी कृशांगी नेत्यर्थः। पुनः कर्माणिव्या

६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारानुधिक्कनिंद्यानीत्यर्थः ।वृत्तनः। ईदृशं तत्सर्वं ईक्षणीयं दर्शनीयं वस्त्वित्यर्थः। वसंततिल
कं छंदः। २५॥ व्याधिं दर्शयति। मदनवेदनेति। मदनवेदना समुत्पन्नो यः संतापकार्श्यादिदोषः
स व्याधिः। यथेति तमुदाहरति। कोदंडमिति। कापि दूती नायिकं प्रति वदति। भो स्वामिन् का
मस्य कोदंडं धनुः। विशिखो बाणः। मनो निवसतिः। मनसि वासश्चेति त्रितयं समुन्मीलति
समुज्जृंभते। तस्या अपि भ्रूवल्ली भ्रूलता। एतेन धनुः। तथा नयनांचलं। नेत्रकोणः एतेन वि
शिखः। ते मनसि वासश्चेति त्रितयं इत्थं तयोः काममत्तस्त्र्योः साम्यविधौ कोदंडादि भ्रूवल्ल्या
दि समत्वेन प्रभवति तथाक्रमात्। अवस्थाभेदेन स्निग्धतां प्रेम क्रियतां। यथा एषामत्सवी
तनुतां कृशतां तन्वाना। विस्तारयंती अतनुतां अनंगत्वं न गच्छति। यथा कामोऽनंगस्तथेयं
नस्यादित्यर्थः। शार्दूलविक्रीडितं छंदः। २६॥ जडतां दर्शयति। विरहेति। विरहस्य व्यापी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.टी.
६४

डातस्याः आविःकारमात्रेणैवेयं ज्ञेयं यत्स्वजीवनावस्थानं तत्र जडता जडभावः। यथेति तमुदा
हरति। पाणिरिति। काचन दूती नायकं प्रतिवदति। हे शठ तनोस्तस्याः पाणिः नीरवकंकणः। नी
रवं शब्दरहितं। चलनाभावात् कंकणं यस्मिन्स तथा। स्तनतटी निःकंपमानं अंशुकं य
स्यां सा। तथा दृष्टिः। निश्चला तारका यस्यां सा। तथा कुंडलं कर्णभूषणं निस्तांडवं। तांडवं नृत्य
वत् क्रीडारहितमित्यर्थः। यदि त्वन्नामस्मरणेन मनसि एवं चरितेन कोपि अद्भुतः पुलकांकुरं
भोरोमांचोद्गमो न संस्तुडंभते प्रकाशते तर्हि चित्रार्पितया चित्रलिखितया सह को भेदो
भवेत्। न कोपीत्यर्थः। शार्दूलविक्रीडितं वृत्तम्। ७२॥ निधनस्यामंगलत्वान्नोदाहृतिरुदाहृवा।
अथ प्रियालोकनाप्राप्तौ एता अवस्था जायंते अतस्तद्दर्शनं बहुविधमित्याह। स्वप्नेति। स्व
प्नश्च चित्रं च साक्षाच्च तेषां भेदेन दर्शनं त्रिधा त्रिप्रकारमित्यर्थः। स्वप्नदर्शनं यथेति तमुदाह

६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रति। मुक्ताहारमिति। हे तन्वि सखि अद्य स्वप्ने बकुल मुकुल भूषणं संदधानो दधत् कोयं चौ
रो मम हृदयं अहरत्। तं चौरं न प्रतीमो न जानीमः। यतः। तावद्धारालंकारे। उच्चगिरेर्मुक्ता
हारं न च। हस्तालंककणं नैव। अपि वा अथवा। कर्णोत्स्वर्णाभरणं नैव नीतवा नितिहारादि
षु सर्वत्र संबंधः। मंदाक्रांता छंदः। ७८॥ चित्रदर्शनं यथेत्युदाहरति। नीवीमिति। बालापटे वि
लिखितं विशेषेण चित्रितं दयितं विलोक्य पूर्ववत् पूर्ववत् नीवीं हरेत् मोचयेत्। पुनर्नखेन उ
रसिजं स्तने विलिखेत्। च पुनः अकस्मात् अलक्षितं दशनेन दंतेन दंतच्छदं दशेत्। इत्थं
अनेन प्रकारेण विहारशंकां न जहार। न त्यक्तवती। वसंततिलकं छंदः। ७९॥ साक्षाद्दर्शनं
यथेति तमुदाहरति। चेत इति। हे चेतः चंचलतां स्वचापलं त्यज। हे प्रियसखि व्रीडे लज्जे मां
न पीडय। वांछितं भंगादित्यर्थः। हे भ्रातः निमेष प्रदृशौ खं च। त्वयि स्थिते दर्शनांतरायादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रं॰टी॰
६४

भावः। कामम दनक्षणं क्षम्पनां। मनसः पीडाकरणादित्यर्थः। यतः। मूर्द्ध्नि बर्हपिच्छं। कर्णयोः
कुवलयं नीलकमलं। करे वंशं दधानः सप्रसिद्धः। अयमित्यनुभवेन सुंदरो दामोदरः। दामउ
दरे यस्य सश्रीकृष्णः। यशोदया कस्मिंश्चिदपराधे दाम्नात्रुल्लूखले बद्धत्वात्। तदंकितो दर्त्वेन
भक्ताधीनत्वं दर्शितं मे मम लोचनगोचरीभवति नेत्रविषयो न भवतीत्यर्थः। शार्दूलविक्री
डितं वृत्तं। ८०। एवं ग्रंथं कृत्वा कवीन्प्रतिवदति। माध्वीकेति। भोः कवयः काव्यकर्तारः मम कृपया
रसयुक्तां मंजरीं मंजरीव मंजरं तां कर्णभूषणं कुर्वंतु। किंभूतां। माध्वीकं मधु तस्य स्पंदः स्रव
णं तस्य संदोहः समूहस्तेन सुंदरीं। सर्वतः कमनीयामित्यर्थः। अनुष्टुप् छंदः। ८१। पित्रादि
कं प्रकाशयन् ग्रंथं समाप्तिं करोति। तातइति। यस्य कविकुलालंकारचूडामणिर्गणेश्वरः त
न्नामा तातः पिता यस्य। सुरसरितो गंगायाः कल्लोलैः किर्मीरिता विचित्रिता विदेहभूः ज

६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकभूमिर्देशः तैरभुक्तदेश इत्यर्थः। तेन श्रीभानुना कविना स्वकृतेन पद्येन श्लोकेन मंजरीत
न्नामा ग्रंथः योजिता कृतेत्यर्थः। किंभूता। वाग्देव्याः सरस्वत्याः श्रुतौ कर्णे यत्र पारिजातकुसु
मं कल्पतरुपुष्पं रसस्पर्द्धी करोतीति सा तत्तुल्येत्यर्थः॥ ८२॥ ॥ श्रीमद्द्राविडनीवृदंबु
धिविधुः श्रीमान्नृसिंहो भवद्भट्टः श्रीहरिवंश उत्तमगुणग्रामैकभूस्तत्सुतः। तत्पुत्रस्य कृति
स्त्वियं वितनुतां गोपालनाम्नो मुदं गोपीनाथपदारविंदमकरंदानंदचेतोलिनः॥ १॥ म
त्सरपरिहृतमनसां सुधियां उरतः परिस्फुरत्वेषा। रसिकललाटतटस्था रस्या रसमंज
रीटीका॥ २॥ ॥ इति श्रीहरिवंशभट्टैकचरणशरणगोपालभट्टकृता रसिकरंजनी
टीका समाप्ता॥ लिखितं भट्टलंबोदरेण॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखि
तं मया। यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥ . शुभमस्तु॥ ॥

६४

KKSU LIBRARY RAMTEK 441 106 Dist. Nagpur M-1498

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=25.09.20 15:11
,TRANSFERRED=2020/09/25 at 15:26:38
,PAGES=126
,TYPE=STD
,NAME=S0003731
,Book Name=M-1498-RASMANJARI TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection